Patanjali

Mahabhasyapradipodyotah

PK
531
A15
1899
v.2
pt.1




UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

PK
531
A15
1899
V. 2
PT. 1



BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1000.



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODDYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA CĀSTRI

VOL. II, FASCICULUS I.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

L OF BOOKS FOR SALE

T THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

*dvaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitareya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Anu Bāsyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ eah		10	0
*Bhāmati, (Tet) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vl. I, Fasc. 1–3		1	2
Bṛhaddēvatā (Tet) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Puṛāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Catalogue of Sanskit Books and MSS., Fasc. 1–3 @ 2/ each ...		6	0
Çatapatha Brāhmaṇa Fasc. 1–5		1	14
*Caturvarga Chintāmani (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1–2		1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ...		4	14
Ditto Çānkhāyana (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. VII, Fasc. 1–4 @ /6/ each		5	10
Çri Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3		1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1 @ /6/ each		3	12
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6 each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāmsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, Text Fasc. 1–3 @ /6		1	2
Nyāyavārtika, Text Fasc. 1–4 @ /6/		1	8
*Nirukta. (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nityacarapaddhati Fasc. I–II (Text) @ /6/		0	12
Nyayabindnṭika, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each		3	6
Padumawati Fasc. 1–3 @ 2/		6	0

महाभाष्यप्रदीपोद्द्योतः ॥

पाणिनिकात्यायनपतञ्जलिभ्यो
गुरुभ्यो नमः ॥

गाङ्कुटादिभ्यो ऽञ्णिन्ङित् । १ । २ । १ ॥

अस्य [1]तद्वदतिदेशत्वेन वार्त्तिकानुत्थानमाशङ्क्याह

[2]चत्वारो ऽत्रेति ॥ (कै)

उपक्षिप्ताः । (कै)

दूषणद्वारा साचाच्चोक्ता इत्यर्थः ॥

तत्राद्येति । (कै)

तत्र हि गाङ्कुटादिभ्यः परोऽञ्णित्प्रत्यय इत्संज्ञकङकारयुक्त

---

१ तद्वदतिदेशो ऽकिद्विधिप्रसङ्गः । वा ॥

२ चत्वारोऽत्र पक्षा उपक्षिप्ता भाष्ये । ङित्त्वकित्त्वसम्बन्धप्रतिपादनं भावनासंज्ञाकरणमतिदेशश्चेति ॥

(गाङ्कुटादिभ्यो ञ्णिन्ङित् । १। २। १ ।) (अ. १। पा. २। आ. १)

इत्यर्थः ॥ [१]"तयोरिति" तच्छब्देन गुणभूतयोरपि ङकारककारयोर्वुद्धिस्थतया परामर्श इत्याह भाष्ये

ङकारककारयोरिति । (भा)

यथा चैतत्तथा पस्पशायामुक्तम् ॥ "ङित्त्वकित्त्वयोरप्रसिद्धिरिति" तद्व्यवहाराप्रसिद्धिरित्यर्थस्तदाह

येन तस्येति ॥ (कै)

सत्त्वे वेति । (कै)

यङादेरिति शेषः॥ अञ्णिद्ग्रहणवैयर्थ्यापत्त्या च [२]"मो राजी"तिवल्लोपाभावार्थमनुवाद इति न शङ्क्यम् । ननु शशविषाणादिशब्दैरसतापि विषाणेन शशस्य सम्बन्धः प्रतिपद्यते इति चेन्न । तदद्स्याप्यप्रामाण्यप्रसङ्गात् ॥

अञ्णिद् ग्रहणेति । (कै)

न च "[३]वृद्भ्येद्" इति विहितञ्यङः [४]कर्मेर्णिङश्च व्यावृत्तये तदिति वाच्यम् । "गाङ्कुटादिभ्यो"नेन तयोर्विधानेऽपि प्रत्ययाधिकारेऽस्य पाठाभावेन प्रत्ययत्वाभावाद् ञ्कारणकारयोरित्वाप्रवृत्तौ ञ्णितोस्तयोरसम्भवात् ॥ भाष्ये

---

१ ङित् किद्वचने तयोरभावादप्रसिद्धिः । वा । ङित् किद्वचने तयोरभावाङ्ककारककारयोरभावाङ्ङित्त्वकित्त्वयोरप्रसिद्धिः ।

२ मो राजि समः क्वौ । ८ । ३ । २५ ॥

३ वृद्भ्येत्कोसलाजादाङ्यङ् । ४ । १ । १७१ ॥

४ अ ३ । पा १ । सू ३० ॥

[1]भाव्येते तर्ह्यनेनेति । (भा)

प्रकरणेनेत्यर्थः ॥ ननु "भाव्येत" इत्युक्तं पञ्चमी निर्देशेनादेश-विध्यसम्भवादत आह

गाङिति ॥ (कै)

गाङादिभ्यः परस्य प्रत्ययस्य तस्यादेः ङित्त्वादिशेषण एव विधितात्पर्यमित्याह

ङकार इति ॥ (कै)

नन्वेवं लोपस्यावश्यकत्वेन विधानं व्यर्थमत आह

इतां चेति । (कै)

एवं च कार्य्यार्थविधानमिति भावः ॥ ननु भाव्यमानः सर्वो-ऽप्यादेश एवेत्यत्र मानाभावादादेश प्रतिषेध इत्ययुक्तमत आह

टित्त्वेति । (कै)

अनेनागमत्वं निराकृतम् ॥ उरण्रपरवदनन्तरोऽस्त्विति चेदत्राह

ङ इदनन्तर इति ॥ (कै)

नन्वेवमपि बहुव्रीहिणा ङिच्छब्देन प्रत्ययाभिधानात्तस्य चानेकाल्त्वात् कथमादेः स्यादत आह

तत्पुरुष इति ॥ (कै)

न च तस्यादित्वे दत्त्वं व्यर्थं [2]"लशकतद्धिते" इत्येव सिद्धिरिति

---

१ भाव्येते तर्ह्यनेन । गाङ्कुटादिभ्यो ऽञ्णिन्ङिद्भवतीति । असंयोगाल्लिट्-कित् (१। २। ५) भवतीति ॥ २ अ १ । पा ३ । सू ८ ॥

(गाङ्कुटादिभ्यो ञ्णिन्ङित् । १। २। १।) (अ. १। पा. २। आ. १)

वाच्यम् । अतद्धित इति पर्युदासेन प्रत्ययसंज्ञाकाल्किादेरेव तेनेत्त्वविधानात् ॥ अनुपपादोऽनुपपत्तिः । तामेव दर्शयति

[१]कुटितेत्यादाविति ॥ (कै)

[२]अथ अस्मादेवेति ॥ (कै)

अन्तरतमपरिभाषासंस्कृतादित्यर्थः ॥

अन्त्यस्य स्युरिति । (कै)

न च ङित्त्वस्य गुणप्रतिषेधाद्यर्थत्वेना[३]चारितार्थ्यात्तातङ्न्यायेन सर्वादेशो भविष्यतीति वाच्यम् । गुणप्रतिषेधाद्यर्थत्वे सर्वादेशत्वं सर्वादेशत्वे च तादर्थ्यमित्यन्यान्याश्रयेण सर्वादेशत्वालाभेऽन्त्यादेशत्वापत्तेरिति भावः । तातङस्तु यथा सर्वादेशत्वं तथोक्तम् ॥ भाष्ये

[४]तस्मादित्युत्तरस्य इति । (भा)

एवं च "[५]आदेः परस्य" इत्यस्य प्राप्त्यादेशपत्वे दृष्टासिद्धेः स

---

१ कुटितेत्यादौ प्रसिद्धङित्त्वाच्च ञादयो यद्यादेशाः क्रियन्ते तदा नैते तदर्थाभिधाने समर्थास्तृञादयश्च नेह शास्त्रे प्रसिद्धाः ॥

२ अथास्मादेव वचनादपूर्वाः क्रियेरन् तदा ङित्त्वेत्यन्त्यस्य स्युः ॥

३ गुणप्रतिषेधार्थत्वे सर्वादेशत्वं सर्वादेशत्वे च तादर्थ्यमित्याद्यर्थत्वेन । इ पुस्तके अत्र एवम्विधपाठोऽस्ति तत्तु न सम्यक् ॥

४ एवं तर्हि षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते । न चात्र षष्ठीं पश्यामः । "गाङ्कुटादिभ्य" इत्येषा पञ्चम्यञ्णिदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य (१ । १ । ६७) इति ॥

५ अ १ । पा १ । सू ५४ ॥

(अ. १। पा. २। आ. १) (गाङ्कुटादिभ्यो ऽञ्णिन्ङित् । १। २। १ ।)

न युक्त इति भावः । सम्प्रसारणं व्यचे "ग्रहिज्या" इत्यनेन ॥

[1]"गाङ्कुटादिभ्य" इति व्यचिमेवानुवदेदिति भावः ॥ भाष्ये

क्ङिङ्ग्रहण इति ॥ (भा)

"क्ङितिचे"त्यादावित्यर्थः ॥

क्ङचिमेति। (कै)

उभयगतिमजानत इदं दूषणं बोध्यम् ॥ भाष्ये

[2]एष ब्रह्मदत्त इति (भा)

भेदप्रदर्शनम् ॥ "अब्रह्मदत्तम्" इत्यास्थायं चेत्यादिः ॥ तदाह

[3]निर्ज्ञाते भेदे इति । (कै)

निर्णीते भेदे इत्यर्थः ॥

अतिदेशगतिरिति । (कै)

तत् फललाभ इत्यर्थः । आहार्य्यारोपस्य तत् कार्य्यबोधनफलकत्वादिति भावः ॥ व्यपदेशातिदेशे किद्व्यपदेशविरुद्धा किं व्यपदेशस्य स्वाश्रयस्य निवर्त्तनादाह

---

१ व्यचिमेवानुवदेदित्यारभ्य उभयगतिम् इत्यन्तं नास्ति गोल्डस्टुकारसङ्गृहीत इंग्लण्डीयभाष्यपुस्तके । तत्तु लेखकप्रमाद एव ॥

२ तद्वदतिदेशस्तर्ह्ययम् । गाङ्कुटादिभ्योऽञ्णिन्ङिद्वद्भवतीति । असंयोगाल्लिट्किद्वद्भवतीति । स तर्हि वतिनिर्देशः कर्त्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह तेन मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यङितं ङिदित्याह ङिद्वदिति गम्यते । अकितं किदित्याह किद्वदितिगम्यते ॥

३ निर्ज्ञाते भेदे तत्कार्य्यप्राप्तये तद्रूपारोपणं क्रियते इत्यतिदेशगतिः ॥

कार्य्येति ॥ (कै)

व्यपदेश्यम् । (कै)

ङित्त्वादिरूपं निमित्तम् । करणे घञ् । यदि तु अतिदिश्यमानविरुद्धस्वाश्रयकार्य्याभाव अतिदेशस्वभावसिद्धः । यथा तत्रैव[1] मद्यपानादिनिवृत्तिरिति न दोषस्तथापि परिहारान्तरस्याभिधास्यमानत्वान्नैतत् सुष्ठुनिरूपितं भगवता ॥

विशिष्टमत्रेति । (कै)

ततः परस्य यत्तन्नातिदिश्यत इत्यर्थः॥ सप्तम्यर्थे वतेरविधानादाह

सप्तम्यर्थे इति ॥ (कै)

यद्यपि सप्तम्यर्थवत्यन्यैकदेशस्तदर्थे प्रयुक्तः "सत्या सत्यभामे"तिवदित्यपि भाष्याशयो वक्तुं शक्यस्तथापि "[2]सार्वधातुकमि"ति सूत्रविषये पचेतामित्यादौ "[3]आतोङित" इति स्वकार्य्यस्यातिदेशानापत्तिरत आह

अयं भाव इति ॥ (कै)

तद्रूपासङ्गः । (कै)

तद्रूपारोप इत्यर्थः ॥ निर्लिङ्गव्याख्यानमयुक्तमत आह

उपदेश्येति ॥ (कै)

पूर्वस्येति । (कै)

---

१ दृष्टान्ते । इ ॥ २ अ १ । पा २ । सू ४ ॥

३ अ ७ । पा २ । सू ८१ ॥

(अ. १। पा. २। आ. १) (गाङ्कुटादिभ्यो ऽञ्णिन्ङित् । १। २। १ ।)

परभिन्नस्येत्यर्थः ॥ भाष्ये

सप्तम्यर्थेऽपि । (भा)

इत्यपिना षष्ठ्यर्थसंग्रहस्तेनोभयसिद्धिः । "[1]तेन तुल्यम्" इति वत्यन्तैकदेशग्रत्वाभावे तात्पर्य्यात् तेन ततः परस्य यत्कार्य्यं तन्नेति बोध्यम् ॥

अनुबन्धभेद (कै)

इत्यस्य प्रत्ययादावित्यादिः ॥

अतिदेशेऽपि भेदेनेति । (कै)

अत्र प्रकरणे इत्यादिः । अपिना तत्तत्प्रदेशेषु यो भयग्रहणं न कर्त्तव्यं भवतीति सूचितम् । श्वेः "[2]विभाषाधेट् श्व्योः" इति चङ् । "[3]जृस्तम्भु" इत्यङ् च । वचेः "[4]अस्यति वक्ति" इत्यङ् । "[5]वच उम्" इत्युम् । सर्वत्र ङित्त्वे कित्त्वे वा दोषाः ॥ भाष्ये

[6]यथेह भवतीति । (कै)

---

१ अ ५ । पा १ । सू ११५ ॥ २ अ ३ । पा १ । सू ४९ ॥

३ अ ३ । पा १ । सू ५८ । ४ अ ३ । पा १ । सू ५२ ॥

५ अ ७ । पा ४ । सू २० ।

६ यथेह भवति सुप्तः सुप्तवान् इत्येवं स्वपितः स्वपिषः अत्रापि प्राप्नोति । चङादिषु प्रयोजनम् । के पुनश्चङाद्यः । चङङ्नजिङ् ङ्वनिवयङ्नङः । चङ् । यथेह भवति शूनः शूनवानित्येवमग्निश्वियत् अत्रापि प्राप्नोति । अङ् यथेह भवति शूनः उक्त इत्येवमश्वत् अवोचत् अत्रापि प्राप्नोति । नजिङ् । यथेह भवति सुप्त इत्येवं स्वप्नक् अत्रापि प्राप्नोति । ङ्वनिप् । यथेह भवतीष्ट इत्येवं यज्ञा अत्रापि प्राप्नोति । अयङ् । यथेह भवत्युषित इत्येवमावसथः अत्रापि प्राप्नोति । नङ् । यथेह भवतीष्ट-मित्येवं यज्ञः अत्रापि प्राप्नोति ॥

(गाङ्कुटादिभ्यो ऽञ्णिन्ङित् । १। २। १ ।) (अ. १। पा. २। आ. १)

भाष्यस्य यथेह शून दत्यादौ संप्रसारणं भवति । तथा चङ्-दावपि स्यादित्यर्थः ॥

अथङ् इति (भा)

एवमानुपूर्वीक एव प्रत्यय इति भावः । अन्यथा फलाभावाद् "उपसर्गे वसेः" इत्यत ङिदित्यनुवृत्तौ भाष्यासङ्गतिः स्पष्टैवेति केचित् ॥ भाष्ये

[1]अपर आहेति । (भा)

यद्यपि सर्वत्र ङित्त्वे कित्त्वे वा सूत्रे तत्पदमेवोपादातव्यमेवं च सर्वथा "जागरित" इत्यादौ गुणभवनमसिद्धम् इति भाष्यदृष्टान्ता-सङ्गतिस्तथापि "जागरित" इत्येतत्सिद्ध्यर्थमन्यतरदपि यदि तत् सूत्रेण क्रियते तदाऽयं ग्रन्थ इत्याशः ॥ [2]"नू धू" कुटादौ ॥

सप्तमीनिर्देशादिति । (कै)

वस्तुतः "पूर्वस्य कार्य्येऽतिदेश" इत्यस्य परभिन्न कार्य्ये इत्यर्थः । स्वकार्य्यस्त्विष्यत एव "[3]आतो ङित" इत्यादीति बोध्यम् ॥ ननु "[4]नङ्क्ता" इति निषेध औपदेशिकस्यैवेति न दोषोऽत आह

न क्ङिति ॥ (कै)

---

१ अपर आह जाग्रो गुणविधिः । जागर्त्तेर्गुणविधिः प्रयोजनम् । यथेह भवति जागरितः जागरितवानित्येवं जाग्रतः जाग्रथ इत्यत्रापि प्राप्नोति ॥ २ णू स्तवने । धू विधूनने ॥

३ अ ७। पा २। सू ८१ ॥ ४ अ १। पा २। सू १८ ॥

ननु औपदेशिकस्य प्रथमोपस्थितत्वेन तन्निषेधेन चरितार्थमातिदेशिकं न निषेधेदित्यरुचेराह

[1]अथवेति ॥ (कै)

न स्यादिति । (कै)

कुटादिभ्यः परस्य कित्त्वविधानं त्वन्यच्च चरितार्थं कुटित्वा इत्यादौ कित्त्वप्रतिषेध एव स्यात् । न तु कित्त्वमिति भाष्याच्चरार्थः । एवं च कुटित्वा इत्यादौ गुणः स्यात् ॥ ननु पृथगनुबन्धकरणेऽपि नुविलेत्यादौ कथं "[2]अुक" इति निषेधो न ॥ औपदेशिककित्त्वसत्त्वादित्यत आह

[3]ङित्त्वेनेति ॥ (कै)

भाष्ये

[4]तस्मादिति । (भा)

एवं चादेशे पञ्च इति स्थितम् ॥

---

१ अथवा यदप्राप्तं कार्यं तदतिदिश्यते इति क्त्वाप्रत्यये कित्त्वातिदेश एव न स्यात् ॥

२ अ ७ । पा २ । सू ११ ॥

३ ङित्त्वेनात्र कित्त्वं येन नाप्राप्तिन्यायेन बाध्यत इति भावः ॥

४ तस्मान् नूत्वा धूत्वेत्येव भवितव्यम् ॥

सार्वधातुकमपित् । १। २। ४॥



लिङ्गादिति । (कै)

चङादीनां ङित्त्वादित्यर्थः । तुल्यजातीयस्य ज्ञापने ह्लजादौ ङित्त्वमतिव्याप्तम् । धातुप्रत्ययसामान्यविषये तु ज्ञापकेऽव्याप्तमिति भावः ॥ आर्धधातुकशब्दस्य चरित्यादेर्यटगन्तत्वेनान्तोदात्तत्वाद् "[1]बक्चोऽन्तोदात्तादि"-ति ठञ् प्राप्नोतीत्यत आह

[2]अर्द्धेति । (कै)

अर्द्धधातुशब्दः तत्पुरुषेऽन्तोदात्तः ततश्च भवादावर्थे "बक्च" इति ठञ् ञित्वादाद्युदात्तत्वमिति भावः ॥

[3]भवेति । (कै)

तेषु भवा संज्ञार्धधातुकमित्यर्थः ॥

ठञन्तत्वादिति । (कै)

आर्द्धधातुकशब्दस्येति शेषः । आर्द्धधातुकसंज्ञायां संज्ञित्वेन भवानार्द्धधातुकीयानित्यर्थः । आर्द्धधातुक इति वदार्द्धधातुका-

---

१ अ ४ । पा ३ । सू ६७ ॥

२ उपलब्धविवरणपुस्तके "अर्धेति" इति पाठोऽस्ति । भाष्ये कैयटे च "आर्ध" इति दृश्यते ॥

३ आर्धधातुकेषु भवा इति ठञन्तत्वादन्तोदात्तत्वाभावाद् "बक्चोऽन्तोदात्तादृञ्" इति ठञभावे वृद्धाच्छो भवति ॥

नितिवक्तव्ये [1]आर्द्धधातुकीयानित्युक्तिः "प्रियतद्धिता दाक्षिणात्या" इति न्यायेनेति बोध्यम्॥ ननु हेर्ङित्वेनैव सिद्धे तदादेशतातङो ङित्त्वं सार्वधातुकाङित्त्वस्य ज्ञापकं स्यादत आह

[2]तातङस्त्विति॥ (कै)

पित्त्वान् ङित्त्वाप्राप्तिरिति। (कै)

तद्धि सुत्वेत्यत्र तुगर्थमनुदात्तार्थं चावश्यकमिति भावः। एवं च पूर्वसूत्रे सहनिर्देशादिहापि तदुच्चारणमिति तात्पर्य्यम्। यद्वा [3]क्वनिप् प्रक्षिप्तः। [4]"ङ्वनिप् भूतकालानामिति" च प्रक्षिप्तः पाठ इति तात्पर्यम्॥

[5]लुङ्विकरणानामिति। (कै)

ते च सिच्चिण्यादयः॥

---

१ सार्वधातुकग्रहणं किमर्थम्। अपिदितीयत्यच्यमान आर्धधातुकस्याप्यनेनापितो ङित्त्वं प्रसज्येत। कर्त्ता हर्त्ता। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नानेनार्धधातुकस्यापितो ङित्त्वं भवतीति यदयमार्धधातुकीयान् कांश्चिन्ङितः करोति चङङ्नजिङ् ङ्वनिबथङ्नङः। सार्वधातुकेऽप्येतज्ज्ञापकं स्यात्। नेत्याह। तुल्यजातीयस्य ज्ञापकम्। कश्च तुल्यजातीयः। यथा जातीयकास्चङङ्नजिङ् ङ्वनिबथङ् नङः। कथं जातीयकास्चैते। *आर्धधातुकाः॥

२ तातङस्तु ङित्त्वं तिपः पित्त्वादप्राप्तमित्यज्ञापकं सार्वधातुकाङित्त्वस्य क्वनिपो ङित्त्वमज्ञापकमस्य हि पित्त्वान् ङित्त्वाप्राप्तिः॥

३ क्वनिप् प्रक्षिप्तः॥ ४-५ यद्येतदस्ति तुल्यजातीयस्य ज्ञापकमिति चङङौ लुग्विकरणानां ज्ञापकौ स्यातां नजिङ्वर्त्तमानकालानां ङ्वनिप्भूतकालानामथङ्शब्द औणादिकानां नङ्शब्दो घञर्थानाम्। तस्मात् सार्वधातुकग्रहणं कर्त्तव्यम्॥

---

* "आर्धधातुकीयाः" इति पाठोऽपि भाष्ये दृश्यते॥

प्रत्यादिवद्भावादिति । (कै)

शाब्दफललाभादादिवत्त्वमेव प्राप्नोति नत्वं तद्भावः तेन हि ङित्त्वाभाव आर्थः फलति न तु शाब्द इति भावः ॥

[1]साधारणेति । (कै)

व्याश्रयेऽप्यस्य प्रवृत्तिमङ्गीकृत्येदम् । वस्तुतस्तु विभिन्ननिमित्ते प्रवृत्तावपि विभिन्नस्थानिकेन तत्परिभाषाप्रवृत्तिरिति भाष्याशयः ॥

[2]यद्यपीति । (कै)

अकारयोरेकादेशस्योक्तन्यायेनापित्त्वेऽपि उभयत आश्रयणेऽन्तादिवत्त्वनिषेधात् सार्वधातुकत्वाभावेन न ङित्त्वम् । परादिवद्भावेन तु न सार्वधातुकत्वालाभः । परस्य सार्वधातुकावयवत्वेऽपि तत्त्वाभावादिति भावः ॥

परं प्रतीति । (कै)

परं समुदायं प्रतीत्यर्थः । एकादेशस्थानिनावचौ पूर्वपरौ ययोः समुदाययोरन्तादी एकादेशोऽपि तयोरेवान्तादिवदिति सूत्रार्थ इति भावः ॥ अभ्युपेत्यापि अचावेव प्रत्यन्तवत्त्वे दोषान्तरमाह

---

१ साधारणपरिहाराभिधाय वर्णादाङ्गमिति नाश्रितं प्रसज्यप्रतिषेधे तु ङित्त्वनिषेधः ॥

२ यद्यपि सार्वधातुकावयवस्याकारस्यैकादेशः तथापि परं प्रत्यादिवत्त्वादन्तशब्दः सार्वधातुकमपिद् भवतीति स्यादेव ङित्त्वं च्वे इति चोत्तमैकवचने सर्वस्यैव सार्वधातुकस्यैकादेश इति ङित्त्वप्रसङ्गः ॥

च्यवे इति । (कै)

[1]"हलः श्नः" सूत्रभाष्ये तु "ङित्त्व पित्त्व पित्त्व ङित्त्व" इत्यर्थसिद्ध्यर्थं प्रसज्यप्रतिषेध एवाश्रितः ॥

[2]यद्यप्युत्तमस्येति । (कै)

[3]"आडुत्तमस्य" इत्यस्योत्तमस्याडागमो भवति यस्माट् स पिदित्यर्थ इति भावः ॥ ननु आटायमेकादेशो न च स पिद्वय-वो मिबेव हि पित् इत्यत उक्तं

तङ्ङित्त्वादिति । (कै)

शास्त्रेण तङ्ङित्त्वबोधनादित्यर्थः ॥ ङित्त्वविधिप्रतिषेधौ न पूर्वस्य कार्य्ये इत्यत आह

[4]यथेति ॥ (कै)

अव्यवधानबुध्येति । (कै)

श्नप्श्नयोरव्यवधानबुध्येत्यर्थः ॥ भाष्ये

[5]व्यवधानमिति । (भा)

ङित्त्वप्रयुक्ते निषेधकर्त्तव्ये श्नपा व्यवधानमित्यर्थः ॥

---

१ अ ३ । पा १ । सू ८३ ॥

२ यद्यप्युत्तमस्य पित्त्वं तथापि तङ्ङित्त्वादाटः पिदवयवस्यैकादेशः पित उत्तमस्यादिवदिति स्यान् ङित्त्वनिषेधः ॥

३ अ ३ । पा ४ । सू ९२ ॥

४ यथा स्यानिकाले यथायोगं गुणप्रवृत्तिनिवृत्ती तथाऽऽदेशेपि कृते व्यवधानबुद्धा भवतः ॥

५ एकादेशः पूर्वविधौ स्यानिवदिति स्यानिवद्भावाद्व्यवधानम् ॥

असंयोगाल्लिट् कित्। १। २। ५॥

[1]"ऋदुपधेभ्य" इति विशिष्योक्तिः किमर्थेत्यत आह

[2]बिभिदतुरिति । (कै)

यद्यपि गुणे कृते कित् कार्य्याभावात् तदप्राप्तौ कित्त्वमनित्यमिति शक्यं वक्तुं तथापि कृताकृतप्रसङ्गमाश्रित्य नित्यत्वमिति भावः। न तु क्रमस्यानवकाशत्वादित्ययुक्तम्। गुणे कृतेऽपि भूतपूर्वगत्या क्रमप्राप्तेरत आह

[3]यथेति । (कै)

अन्यथा जातस्य निषेधायोगेन विशिष्टविधानं व्यर्थं स्यादिति भावस्थायां प्राप्तगुणं बाधित्वा क्रम एवेति भावः ॥

तथेति । (कै)

ऋदुपधविषयैतल्लक्षणोपस्थापितनिषेधसामर्थ्यादित्यर्थः ॥ ननु विध्युन्मूलकत्वेन निषेधस्य बलवत्त्वप्रपञ्च कार्य्यातिदेशोऽत आह

---

१ ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्विप्रतिषेधेन । वा । अ १ । पा २ । ५ ॥

२ बिभिदतुः बिभिदुरित्यादौ कित्त्वं नित्यं गुणस्त्वनित्यः वस्तत इत्यादौ तु द्वयोरप्यनित्यत्वं तच्च परत्वाद् गुणप्रसङ्गः पूर्वविप्रतिषेधाश्रयेण निवार्य्यते ॥

३ यथा क्रमस्य कित्करणसामर्थ्याद् गुणो बाध्यते तथैवेह्यातिदेशसामर्थ्यादित्यर्थः ॥

[1]दुर्बलेनेति । (कै)

अतिदेशदुर्बलत्वे हेतुः "[2]कृतार्थत्वाद्" इत्यन्तः ॥

[3]तातङ् न्यायेनेति । (कै)

तातङि गुणादिनिषेधार्थत्वेन ङित्त्वस्य चरितार्थत्वाद् "[4]अनेकाल् शित्" इत्यनेन यथाऽपवाद् "ङित्त्व" इत्यस्य बाधस्तथेत्यर्थः । केचित्तु इदं न युक्तं विचति ग्रहातीत्यादौ संप्रसारणेन चरितार्थतया ङित्त्वस्य गुणनिषेधातिदेशानापत्तेः । अतिदेशोपस्थुततद्विषयनिषेधसामर्थ्याद् गुणबाध इत्येवं वार्त्तिकस्य कैयटेन व्याख्यानादेतदाश्रयानभिज्ञैकदेशिनश्च [5]विषम इत्यादिग्रन्थ इत्याहुः ॥

१-२-३ क्तस्य कित् करणे प्रयोजनान्तराभावः । इह तु सम्प्रसारणविधौ कृतार्थत्वाद् दुर्बलेन अतिदेशेन प्राप्यमाणो गुणनिषेधो दुर्बलत्वान्न तद्विधिना सह स्पर्धते तातङ् न्यायेन ॥

४ अ १ । पा १ । सू ५५ ॥

५ उक्तं वा । वा । किमुक्तम् । न वा क्तस्यानवकाशत्वादपवादो गुणस्येति । विषम उपन्यासः । युक्तं तत्र यदनवकाशं कित्करणं गुणं बाधत इह पुनरुभयं सावकाशम् । कित्करणस्यावकाशः । ईजतुः । ईजुः । गुणस्यावकाशः । वर्त्तित्वा । वर्द्धित्वा । इहोभयं प्राप्नोति । वर्तते । वर्धते । परत्वाद् गुणः प्राप्नोति । इदं तर्ह्युक्तमिष्टवाचीपरशब्दो विप्रतिषेधे परं यदिष्टं तद् भवति ॥

[१]इन्धिभवतिभ्यां च । १ । २ । ६ ॥

इष्टासिद्धिमेव दर्शयति

[२]बभूवेत्यजिति ॥ (कै)

ननु कित्त्वविधानसामर्थ्यादनिग् लक्षणाया अपि वृद्धेः प्रतिषेधो भविष्यतीत्यत आह

गुणमात्रेति । (कै)

एवं च तन्निषेधेनास्य चारितार्थ्येनानिग् लक्षणवृद्धिनिषेधकत्वे मानाभाव इति भावः ॥ ननु छन्दस्येव "समीधे" इत्यादौ नलोपाद्यर्थं कित्त्वमावश्यकमत आह

---

१ किमर्थमिदमुच्यते । इन्धेः संयोगार्थं* वचनं भवतेः पिदर्थम् ॥ अयं योगः प्रक्योऽवक्तुम् । कथम् । इन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वात्ताभ्यां† किद्वचनानर्थक्यम् । वा । इन्धेश्छन्दोविषयो लिट् । नह्यन्तरेण च्छन्द इन्धेरनन्तरो लिड् लभ्यः । आमा भाषायां भवितव्यम् । भुवो वुको नित्यत्वात् । भवतेरपि नित्यो वुक् । छतेऽपि प्राप्नोत्यछतेऽपि । ताभ्यां किद्वचनानर्थक्यम् । ताभ्यामिन्धिभवतिभ्यां किद्वचनमनर्थकम् ॥

२ विनापि सूत्रेणेष्टं सिध्यति सत्यपि चेष्टं न सिध्यति । बभूवेत्यज् लक्षणत्वात् वृद्धेरिग् लक्षणत्वाभावात् प्रतिषेधाप्रसङ्गात् । गुणमात्रनिषेध एव तु बभूविथ अहं बभूव इति च णित्त्वाभावपक्षे स्यादिति प्रश्नो भाष्ये किमर्थमिति ॥

---

* "संयोगार्थं ग्रहणम्" इत्यपि भाष्ये ॥ † "ताभ्यां लिटः" इत्यपि भाष्ये दृश्यते ॥

[1]तचेति ॥ (कै)

नन्वेवं विकरणः स्यादत आह

[2]आर्धेति ॥ (कै)

नन्वेवं शब्दान्तरप्राप्तिः क्वापि न स्यादत आह

[3]सत्यामपीति । (कै)

श्रौतरूपमादायेति भावः ॥

---

१ तच्च "छन्दस्युभयथेति" (६ । ४ । ५) लिटः सार्वधातुकत्वात् समीध इति ङित्त्वान्नलोपः ॥

२ आर्द्धधातुकत्वाच्च श्नमोऽभावः । "व्यत्ययो बहुलम्" इति वचनाद्वा ॥

३ "ओः सुपि" (६ । ४ । ८३) इत्यत "ओः" इति नानुवर्त्तत इति भावः । एकदेशविकृतस्यानन्यत्वाच्च शब्दान्तरप्राप्त्यभावः । सत्यामपि वा शब्दान्तरप्राप्तौ कृताकृतप्रसङ्गित्वाद् वुको नित्यत्वं वुकि कृते गुणस्य प्राप्तिरेव नास्तीति नैतयोस्तुल्यबलत्वम् इति नित्योवगिति भाष्यमुपादायैतदुक्तं कैयटेन ॥

[1]मृडमृदगुधकुषक्लिशवदवसः क्ता। १। २। ७॥

[2]विपरीतेति। (कै)

विशेषणीभूतमृडादिसंकोचस्य न्याय्यत्वादयं न्याय्य इति भावः॥ न च लोके प्रधानसंकोच एव न्याय्यत्वेन व्यवह्रियते "राज्ञः संकोचः कार्य्यः" इति राजनिमित्तं स्वव्यवहारसंकोचस्तद्विस्तररूपः कर्त्तव्य इतितदर्थात्। समाधत्ते

---

१ किमर्थं मृडादिभ्यः परस्य क्तः कित्त्वमुच्यते किदेव हि क्ता। नक्ता सेट् (१।२।१८) इति प्रतिषेधः प्राप्नोति तद्बाधनार्थम्। यदि तर्हि मृडादिभ्यः परस्य क्तः कित्त्वमुच्यतेनार्थो "नक्ता सेट्" इत्यनेन कित्त्वप्रतिषेधेन। इदं नियमार्थं भविष्यति। मृडादिभ्य एव परस्य क्तः कित्त्वं भवति नान्येभ्य इति। यदि नियमः क्रियते इहापि तर्हि नियमान्न प्राप्नोति। लूत्वा पूत्वा। अत्राप्यकित्त्वं प्राप्नोति। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यथा जातीयको मृडादिभ्यः परः क्ता। कथं जातीयकश्च मृडादिभ्यः परः क्ता। सेट्। एवमप्यस्यत्र कश्चिद्विभाषितेट् सोऽनिटां नियामकः स्यात्। अस्तु तावद् ये सेटस्तेषां ग्रहणं नियमार्थं य इदानीं विभाषितेट् तस्य ग्रहणं विध्यर्थं भविष्यति॥

२ विपरीतनियमस्तु व्याख्यानान्न भविष्यति मृडादिभ्यः क्तेव किद्भवतीति। नह्यनियमार्था शास्त्रप्रवृत्तिर्लक्ष्यमूलकत्वाद्व्याकरणस्य स्मृतेः॥

व्याख्यानादिति ॥ (कै)

[1]विशेषणार्थं स्यादिति । (कै)

सुवेत्यादि च व्यावर्त्यं स्यादित्याहुः। अस्यानर्थकत्वेनैव वारणाद्विशेषणव्यावर्त्यं चिन्त्यम् । वस्तुतस्तु क्ङिः कित्त्वसामर्थ्यादेव तुल्यजातीयापेक्षो नियम इति बोध्यम् ॥ भाष्ये विभाषितेड् ग्रहणमुपलक्षणमित्याशयेनाह

[2]गुधेति ॥ (कै)

---

[3]रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। १। २। ८ ॥

ननु "रुदविदे"ति सूत्रे स्वपिप्रच्छिग्रहणमनिटां नियामकं स्यादतो भाष्ये

---

१ क्ङि प्रत्ययमात्रस्य नियमः स्यात् । कित्त्वं तु "क्त्वातोऽसुन् कसुनः" (१। १। ४०) इत्यादौ विशेषणार्थं स्यात् ॥

२ मडमटदवदवसां क्ङिः कित्त्वविधानं नियमार्थं गुधकुषक्लिशीनां तु रलोव्युपधाद् (१। २। २६) इति विकल्पे प्राप्ते नित्यार्थम् । तत्र विधिसम्भवे क्लिशेरनिटः क्ङिः कित्त्वविधानं नियमार्थं न भवति ॥

३ स्वपि प्रच्छ्योः सन्नर्थं ग्रहणं किदेव हि क्ङि ॥

रुदविदस्वपीति । (भा)


तत्र सूत्रे स्वपि प्रच्छ्योर्ग्रहणमित्यर्थः ॥ तद्ध्वनयन् व्याचष्टे

[1]तत्रेति । (कै)

व्याख्यानात् क्ङिया न सम्बन्ध इति भावः । स्वपिप्रच्छ्योः क्तः कित्त्वविधानमनिटः क्त्वो नियमार्थं न भवतीत्यन्वयः ॥

---

[2]इको झल् । १ । २ । ९ ॥



"इको झल्" सूत्रं किमर्थमिति वक्तव्ये किमितीकः परस्येत्युक्तमत आह

इक इति ॥ (कै)

उत्तरार्थं सूत्रमावश्यकमिति भावः । अत एवेक् धातोर्नग्रहणम् । उत्तरार्थाधिकारानुरोधात् ॥ ननु गणस्य परत्वात् कथं दीर्घो बाधकोऽत आह

[3]अज्झनेति । (कै)

एवं चानवकाशत्वाद्दीर्घो गुणस्य बाधक इति भावः ॥ भाष्ये

---

१ तत्र चरितार्थत्वादनिटः क्तः कित्त्वविधानं नियमार्थं न भवति ॥

२ किमर्थमिकः परस्य सनः कित्त्वमुच्यते । भा । "इको झल्" "हलन्ताच्च" इत्येक एव योगः कर्त्तव्यः किमर्थोयोगविभाग इति प्रश्नार्थः ॥

३ "अज् झन् गमां सनि" (६ । ४ । १६) इति दीर्घत्वं नाप्राप्ते गुणे आरभ्यमाणं तस्य बाधकमिति भावः ॥

कृते भवेदिति । (भा)

अनवकाशत्वेन बाधकस्य प्रवृत्त्युत्तरमुत्सर्गप्रवृत्तेरङ्गीकारादिति भावः ॥

[१]शास्त्रं प्रवर्त्तमानमिति । (कै)

एवं चादृष्टार्थं प्रवृत्त्या शास्त्रस्यानर्थक्याभावान्न बाध इति भावः ॥ "शास्त्रमावर्त्तमानम्" इति क्वचित्पाठः । तत्राप्ययमेवार्थः ॥ ननु शास्त्रस्य साधारणत्वेन ह्रस्वविषये एव बाधो नान्यत्रेत्यत्र किं विनिगमकमत आह

[२]ह्रस्वानामेवेति ॥ (कै)

ह्रस्वार्थं दीर्घविधानं चेत् किं तत्राह भाष्ये

भवेदित्यादि ॥ (भा)

गुणायेति । (कै)

एवं च तन्निवृत्त्या रूपविशेषसम्पत्तिः फलमस्त्येवेत्यर्थः ॥ न हीति हि शब्द सूचितं हेतु माह ·

तृप्नोति । (कै)

भाव्यमित्यस्य कर्त्तव्यमिति व्याख्याशेषपूरणमन्यत् ॥

---

१ शास्त्रपूर्वकात् प्रयोगाद्धर्मो न तु शास्त्रप्रवृत्तिमात्रादिति भावः ॥

२ ह्रस्वानामेव दीर्घविधानसामर्थ्याद् गुणो न स्यात् । दीर्घाणां तु प्रागेव तादृप्यादृपविशेषसम्पत्तिफलत्वाच्छास्त्रस्य दीर्घशास्त्राप्रवर्त्तनाद् गुण-प्रसङ्गः ॥

तृप्तिविशेषेति । (कै)

विजातीयाविजातीयाद्घृप्तिस्तत्तद्भोजनफलमिति भावः ॥ भाष्ये

[1]भोजनविशेषादिति । (भा)

भोजनेति कर्मणि ल्युट् । [2]"श्लिल्प विशेषादिति" पाठः ॥

नहीति । (कै)

तच्च घृप्तिविशेषवत् नाच दीर्घविशेषः फलमिति भावः ॥

ह्रस्वेष्टिति । (कै)

लक्ष्यभेदादेकस्यापि विधिनियमरूपेण प्रवृत्तिरिति भावः ॥

येन नाप्राप्तिन्यायेन । (कै)

अनवकाशत्वेन ॥

[3]ऋदित्वम् । (भा)

"ऋत इद्धातोः" इतीत्वम् ॥ णिलोपस्य किंनिमित्तत्वाभावात् कथं णिलोपस्तच्च प्रयोजनमत आह

---

१ सामर्थ्यात्तत्र पुनः प्रवृत्तिर्भवति भोजनविशेषाच्छिल्पिविशेषाद्वा ॥

२ इङ्गलण्डीयभाष्यपुस्तके "डाक्टरवुलार" भाष्यपुस्तके च "श्लिल्पिविशेषादिति" पाठोऽस्ति ॥

३ इकः कित्त्वं गुणो माभूद्दीर्घारम्भात्कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ॥
सामर्थ्याद्धि पुनर्भाव्यम् ऋदित्त्वं दीर्घसंश्रयम् ।
दीर्घाणां ना कृते दीर्घे णिलोपस्तु प्रयोजनम् ॥

[1]असतीति ॥ (कै)

णिलोपस्यापीति । (कै)

बाध्यसामान्यचिन्तायामिति भावः ॥

ज्ञीप्सतीति । (भा)

ज्ञपेश्चुरादिणिचि मितां ह्रस्वे "[2]सनीवन्ते" तीडभावे[3] "आप् ज्ञपी"ति ईत्वेऽभ्यासलोपे रूपम् ॥ विशेषचिन्तायामपि दोष इत्याह

अथवेति ॥ (कै)

ननु येननाप्राप्तिन्यायेन यत्रोभयापवादतासम्भावना तत्रैषां व्यवस्थापकत्वं न च तथा प्रकृते । यथैत्येधतीत्यादौ पररूपत्वावच्छिन्ने बाधे किं शास्त्रविहितस्येत्याकाङ्क्षायां मध्येऽपवादाः पुरस्तादिति न्यायविषयः । येनेत्यस्य यद्धर्मावच्छिन्न कार्यणेत्यर्थः । येन लक्षणेनेत्यर्थे तु नास्य विषयः । नापि कार्यभेदे यच्छब्दपरामर्शानुगमकरूपाभावादिचेन्न । व्यक्तिपक्षे किमिदं गुणवाधकतया सर्वविषयम् उतणिलोपवाधकतया णिविषयमिति सन्देहे व्यवस्थायाया अवश्यापेक्षितत्वेन शास्त्रप्रवृत्तिः सूपपादेत्यभिमानात् । वस्तुतस्त्वेवं सति णिगमेत्येवं वदेदिति बाधसामान्यचिन्तापक्षमाश्रित्यैव भाष्यव्या-

---

१ अ ७ । पा १ । सू १०० ॥

२ असति किन्त्वे गुणवस्त्रिलोपस्यापि विशेषाभावादीर्घत्वं बाधकं स्यादित्यर्थः ॥

३ अ ७ । पा २ । सू ४९ ॥ ४ अ ७ । पा ४ । सू ५५ ॥

ख्योचितेति दिक् ॥ नन्वसत्यपीति येनेत्यस्य येन कार्य्येणेत्यर्थ इति भावः ॥

नैतदिति । (कै)

येनेत्यस्य स्वेतरेणेत्यर्थकतया पदावाध्यसामान्यचिन्तापरत्वमस्य न्यायस्य तदाऽयं ग्रन्थ इति भावः ॥ भाष्ये किंवारम्भेण दोष इत्याह

तत्र णिलोपस्येत्यादिना ॥ (भा)

प्रतिपदविहितेनेति । (कै)

मीविषयेणाचरितार्थेनेत्यर्थः । एवं च तत्र सूत्रे मीग्रहणेन मिनातेरपि ग्रहणं दीर्घस्य प्रयोजनमिति भावः ॥

[१]सावकाशमिति (भा)

भाष्यस्य सार्थकमित्यर्थः ॥

परत्वादिति । (भा)

यद्यपि प्रमित्सतीत्यत्र अपवादत्वाद् दीर्घेण गुणस्येव ज्ञीप्सतीत्यत्र वाध्यसामान्यचिन्तायां णिलोपस्यापि वाधेन भाव्यम् । तथापि दीर्घसमानकालिकस्य णिलोपस्य गुणस्येव वाधेऽपि दीर्घे कृते स्थानिवत्त्वेन प्राप्तणिलोपः स्यादेव । न च दीर्घविधानसामर्थ्यम् । दृम्भावे सामान्यग्रहणसम्भवेन कृतार्थत्वात् । एवं च परत्वादित्यस्य दीर्घोत्तरकालं प्राप्यत्वादित्यर्थः । भ्रष्टावसरन्यायस्तु शास्त्रेणास्त्येवेति भावः ॥

---

१ यथैव तर्ह्यसति कित्त्वे सावकाशं दीर्घत्वं परत्वान्णिलोपो वाधते एवं गुणोऽपि वाधेत ॥

[1]यच लक्षणेति। (कै)

यथा "[2]विभाषा दिक्समासे" [3]द्वतीयासमास इत्यादौ। तत्र हि समासशब्दस्य संज्ञात्वेन तज्ज्ञानाय लक्षणपर्य्यालोचनमित्यर्थः॥

प्रयोगरूपेति। (कै)

तच्च मीयत इत्यादौ प्रयोगनिष्ठम् एवं हि "गामादाग्रहणेष्वविशेषः" इत्यादेरसङ्गतिः स्यादिति मा साहचर्य्यात् मीशब्दांशेऽपि सा नप्रवर्त्तत इत्येव समाधातुं युक्तम्॥ तद्ध्वनयन्नाह

नन्वेवमसत्यपीति। (कै)

कित्त्वाभावेऽज्विषयत्वेनालस्य सुलभत्वादिति भावः। एवं च मीग्रहणमपि व्यर्थमिति तात्पर्य्यम्॥ भाष्ये

[4]मीनातिमिनोत्योर्दीर्घत्वेकृते (भा)

इत्यत्र पर्जन्यवल्लक्षणप्रवृत्तिमाश्रित्यमीनातिनिर्देशः॥ "परत्वादि" त्यस्योत्तरकालप्राप्तत्वादित्येवार्थः। यथादीर्घोत्तरं स्थानिवत्त्वेन णिलोपो भवति। एवं तत्प्रवृत्त्युत्तरमेव गुणोऽपि स्यात् दीर्घत्वं तु सामान्यग्रहणविघातार्थं स्याद् इति भावः॥

नास्त्यनवकाशत्वमिति। (कै)

नास्त्यनर्थकत्वमित्यर्थः॥

---

१ यत्र लक्षणाभिनिर्वृत्तत्वेन शब्दरूपमपेक्ष्यते तत्र लक्षणप्रतिपदोक्तयोरिति परिभाषोपस्थानं न तु यत्र प्रयोगरूपाश्रयणं तत्र॥

२ अ १। पा १। सू २८॥ ३ अ १। पा १। सू ३०॥

४ मीनाति मिनोत्योर्दीर्घत्वे कृते मीग्रहणेन ग्रहणं यथास्यात्॥

दीर्घत्वं वाध्यते इति । (कै)

प्रवर्त्तमपि निवर्त्त्यते इत्यर्थः ॥


धातुरवकाश इति । (कै)

तस्य च कुटादित्वप्रयुक्तङित्त्वेन गुणनिषेधाद्दीर्घस्चरितार्थ इति भावः । एवं चेद् भावे एवावकाशोक्तिर्भाव्योक्ताऽसङ्गतेति तात्पर्य्यम् ॥

उह नेति ।

न चाजादेशगमेरित्यर्थलाभार्थम् अज्ग्रहणम् । हनिसाहचर्य्येण लुग्विकरणस्यानिकादेशगमेरेव ग्रहणेनादोषात् । एवं कुङः सत्वेऽपि न चतिरिति बोध्यम् । कुगुधुभ्यः कुटादिभ्यः सनोऽनभिधानमित्यन्ये ॥

हलन्ताच्च । १ । २ । १० ॥



अन्तग्रहस्य समीपवचनत्वान्नार्थानुपपत्तिर्हल्समीपादिकः पर इत्यर्थः । ततः परत्वं च सामर्थ्यादेकवर्णव्यवहितं ग्राह्यमत आह

अवयवेति ॥ (कै)

भेद एवावयवावयविभावादाह

अत्यन्तभेदेति । (कै)

भेदाभेद एवावयवावयविभाव इत्यर्थः ॥ भाष्ये दृष्टार्थबोधाच्चमत्वेन निर्देशस्यायुक्तत्वम् ।

[1]इको नामेति । (भा)

इगन्तस्य धातोरित्यर्थः ॥

हलन्तः स्यादिति । (भा)

हलन्तावयवः स्यादित्यर्थः ॥

अन्यस्य । (भा)

इगन्तस्य । अन्यहल् कथमन्तो भविष्यतीति शेषः । इक् पदेन वर्णमात्रग्रहेऽपि द्वयोर्वर्णयोः परस्परमवयवावयविभावो विरुद्ध इति

---

१ अयुक्तोऽयं निर्देशः । कथं हि इको नाम हलन्तः स्यादन्यस्यान्यः । कथं तर्हि निर्देशः कर्त्तव्यः । इग्वतो हल इति । यद्येवं यियच्छति अत्रापि प्राप्नोति । एवं तर्हीगुपधाद्धलन्तादिति वक्ष्यामि । एवमपि दम्भेर्न प्राप्नोति । सूत्रं च भिद्यते । यथान्यासमेवास्तु । ननु चोक्तमयुक्तोऽयं निर्देश इति । नायुक्तः । अन्तशब्दोऽयमस्येवावयववाची । तद्यथा । वस्त्रान्तः वसनान्तः । वस्त्रावयवो वसनावयव इति गम्यते । अस्ति सामीप्ये वर्त्तते । तद्यथा । उदकान्तं गत इति । उदकसमीपं गत इति गम्यते । तद्यः सामीप्ये वर्त्तते तस्येदं ग्रहणम् । एवमपि दम्भेर्न सिध्यति । योऽचेक्समीपे हल् न तस्मादुत्तरः सन् । यस्मादुत्तरः सन्नासाविक्समीपे हल् । एवं तर्हि

दम्भेर्हलग्रहणस्य जातिवाचकत्वात् सिद्धम् ॥ वा ॥

हल जातिर्निर्दिश्यते । इक उत्तरा या हल् जातिरिति ॥

इक उत्तरा या हल् जातिरिति । (भा)

अत एव [1]"आर्द्धधातुक" इति सूत्रे वक्ष्यति जातेः पौर्वापर्यासम्भवाद्

विषयसप्तमी विज्ञास्यत इति (भा)

इत्याहुः ॥

लिङ्सिचावात्मनेपदेषु । १ । २ । ११ ॥

सकृत् श्रुतस्यार्थद्वयमिति । (कै)

कालभेदेनार्थद्वयबोधजनकत्वमित्यर्थः ॥ नन्वात्मनेपदं यौ लिङ्सिचाविति व्याख्याने सप्तम्यनुपपन्नेत्यत आह

निर्द्धारणे इति । (कै)

निर्द्धारणं च सजातीययोरिति तदभेदलाभः ॥ भाष्ये

सिजविशेषित इति । (भा)

---

१ आर्धधातुके (२ । ४ । ३५) इति सूत्रव्याख्यानावसरे "अर्थसिद्धिरेवैषा यत्सामान्येन पौर्वापर्यं नास्ति । असति पौर्वापर्ये विषयसप्तमी विज्ञास्यते" एतदेव उक्तं भवता ॥

सम्भवव्यभिचारयोरभावादिति भावः ॥ ननु लिङ आत्मनेपदत्वाभावोऽत आह

लिङ् शब्देनेति ॥ (कै)

ननु सम्भावितात्मनेपदपरत्वौ सुट्सीयुटावेव लिङ्ग्रहणेन ग्रहीष्येते इत्यत आह

सीयुडादीति ॥

ननु अस्तु उभयोरेकशेषनिर्देशोऽत आह

नवेति । (कै)

अनेन शास्त्रीयैकशेषो वारितः ॥

अप्रयोग इति । (कै)

क्तेनैकशेषस्य सूत्रे प्रयोग इत्यर्थः ॥ निर्द्धारणविभक्त्यन्तत्वे सिज्विशेषणत्वासम्भवादाह

[1]आत्मनेपदेति ॥ (कै)

ननु सङ्घशब्दस्य कथमर्थद्वयबोधकत्वमत आह

सारूप्यमात्रेति । (कै)

अर्थभेदेऽपीत्यर्थः । अत्रा इति वदिति भावः । सौत्र एकशेष इति बोध्यम् ॥

---

१ आत्मनेपदपरत्वादुपचारात् सिजेवात्मनेपदमुच्यते गौणमुख्यार्थयोरात्मनेपदशब्दयोः सारूप्यमात्रप्रतिबद्ध एकशेषः करिष्यत इति भावः ॥

[1]समुदाये इति । (कै)


व्यपदेशिवद्भावेनेत्यर्थः ॥

अथवेति । (कै)

तन्त्रत्वमहविवक्षायामपि विद्वन्मानसराजहंसेतिवदिति भावः ॥

---

[2]स्याच्वोरिच्च । १ । २ । १७ ॥



न प्रयुक्त इति । (कै)

एवं च षष्ठीहेतुप्रयोगद्वयस्याप्राप्तिरिति भावः ॥

अपत्यरूपस्येति । (कै)

---

१ अवयवगतं पौर्वापर्यं समुदाय आश्रयिष्यत इति भावः । अथवा तन्त्रेण शब्दद्वयोच्चारणादर्थद्वयं लभ्यते ॥

२ इच्च कस्य तकारेत्त्वम् । कस्य हेतोरिकारस्तपरः क्रियते ॥ दीर्घोमाभूत् । दीर्घोमाभूदिति ॥ ऋतेऽपि सः । अन्तरेणाप्यारम्भं सिद्धेच दीर्घो "धुमास्थागापाजहाति" (६ । ४ । ६६) इति ॥ अनन्तरे श्रुतोमाभूत् । इदं तर्हि प्रयोजनमन्तरे श्रुतोमाभूदिति । कुतो नु खल्वेतदनन्तरार्थं आरम्भे ऋको भविष्यति न पुनः श्रुत इति ॥ श्रुतश्च विषये स्मृतः । विषये श्रुत उच्यते यदा च स विषयो भवितव्यमेव तदा श्रुतेन ॥

इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृतेऽपि सः ।
अनन्तरे श्रुतो मा भूत्श्रुतश्च विषये स्मृतः ॥

तत्त्वेन विवक्षायां तु छोनस्यात् फिञ् च स्यादिति भावः। वस्तुत उक्तादन्य एवेदन्त्वेनेदं पदार्थः शैषाधिकारात्। एवं चेदन्त्वेनाप्यपत्यबोधे शैषिको न साधुरिति [1]"तस्येदम्" इति सूत्रे "[2]तस्यापत्यम्" इति सूत्रे च निरूपयिष्याम इति चिन्त्यमिदम्। स च सम्बन्धो हेतुहेतुमद्भावे पर्य्यवस्यतीति। भाष्ये हेतोरिति प्रयुक्तं हेतुशब्देन चाचफलम्। दत्संज्ञकतकारः किं सुखसुखार्थ उततपरसूत्रप्रवृत्त्यर्थ इति विचारतात्पर्य्यम्॥

तकार इदिति। (कै)

[3]"यस्येति" शैषः। बहुव्रीहेरयं लः। इच्चेत्यचेत्संज्ञकतकारवत्त्वं किमर्थमिति भाष्यार्थः। सुखसुखार्थोऽपि तदर्थत्वेन वर्णोच्चारणस्य सार्थक्यादित्संज्ञां लभत इति भाष्यमतम्। ननु श्रुतत्वाद् हृस्व एव भविष्यतीत्यत आह

[4]आन्तरतम्यादिति। (कै)

सूत्रारम्भं विनेत्यर्थ॥ किं न स्यादत आह

कित्त्वं त्विति। (कै)

तदर्थं सूत्रमावश्यकमिति भावः॥ "ईत्वस्य" इति छेदः॥

[5]असदृश इति। (कै)

सामर्थ्यादसदृशे इत्यर्थः। अव्यवहितपरोऽनन्तरशब्दो नेति भावः॥

---

१ अ ४। पा ३। सू १२०॥ २ अ ४। पा १। सू ९२॥
३ अ ६। पा ४। सू १४८॥ ४ आन्तरतम्यात् प्राप्नोतीति भावः॥
५ असदृश आदेशे क्रियमाण इत्यर्थः॥

[1]यद्यनेनेति । (कै)

टिग्रहणं वाक्येनैव सम्बध्यते न त्वनन्त्येन पदेनेति भावः ॥ भाष्ये "विषये" प्रश्नाख्यानादिविषये श्रुत उच्यते । यदा सविषयो भवति तदाप्यनेनैव सूत्रेण श्रुतेन भाव्यमित्यनुवाददोषभिया नानेन श्रुत-विधानमित्ययमत्र पक्षे भाष्याशयः कार्य्यः ॥

[2]अन्येत्विति । (कै)

अनन्तरेऽपीति सूत्रेऽसदृशे आदेशे श्रूयमाणेऽपीत्यर्थः । क्रिय-माण इति पाठेऽपि श्रूयमाण इत्येवार्थः ॥

दीर्घ एवेति । (कै)

आन्तर्य्यादिति भावः ॥ वार्त्तिके "ऽनन्तरे" इत्यस्यानन्तरे श्रूय-माणेऽपि दीर्घः स्यादिति शेषो बोध्यः ॥ "श्रुतो माभूदिति" शङ्कोत्तरत्वेनावतारयति

नन्विति ॥ (कै)

स्यादिति । (कै)

तथाच तत्र श्रुतदृष्टः स चासति तपरत्वे पुनर्विहितेन दीर्घेण बाधितः सन्नस्यादित्यर्थः ॥ ननु किमिति श्रुतस्तत्रेष्यत इति शङ्कते

---

१ अनेन तपरत्वं प्रत्याख्यायते यद्यनेन श्रुतो विधीयेत तदा यत्रापि विषयेऽनन्त्यस्यापि प्रश्नाख्यानयोरित्यादिना श्रुतो विहितस्तत्राप्यनेन विधीयेत अस्मिन् कर्त्तव्ये "पूर्वत्रासिद्धम्" इत्याश्रयिकस्य श्रुतस्या-सिद्धत्वात्ततश्च पक्षेऽनुवाददोष प्राप्नोतीति क्रम एव भविष्यति ॥

२ अन्ये तु तपरत्वमनेन समर्थितमिति व्याचक्षते । अनन्तरेऽप्यादेशे श्रूयमाणे दीर्घ एव स्यात् ॥

माभूदिति ॥ (कै)

स्मृत इति । (भा)

एवं च प्रश्नाख्यानादिविषये तस्येष्टत्वान्न तन्निवृत्त्यर्थं विधानमित्यर्थः ॥

[1]स चासतीति । (कै)

सिद्धे दीर्घे दीर्घविधानसामर्थ्येन बाधादित्यर्थः । सति तु तपरत्वे दीर्घाप्राप्त्या प्लुतो निर्विघ्न इति भावः । पश्चात्प्राप्तस्तु तपरत्वेन न बाध्यतेऽसिद्धत्वादित्याशयः ॥ प्रकारद्वयमपि दूषयति

[2]प्लुतेति । (कै)

अनन्तस्य पदस्य टेः अपिना वाक्यस्य च टेः प्लुतः प्रश्नाख्यानयोरित्यर्थस्तस्येति भावः । टिग्रहणं वाक्येनैव सम्बध्यते न त्वनन्त्येन पदेनेति तु भाष्यतात्पर्य्यम् । यत्त्वदिदमित्यादौ "[3]गुरोरनृत" इत्येतद्विषयं भाष्यमिति तन्न । तेन ह्रयमानार्थवाचिन एव टेः प्लुतविधानादित्याहुः ॥

---

१ स चासति तपरत्वे न प्राप्नोतीति दीर्घविधत्त्यर्थं तपरत्वं स्थितम् ॥

२ प्लुतविधौ तु "वाक्यस्य टेः" (८। २। ८२) इत्यधिकारात् कथमिकारस्य प्लुतः स्यादिति चिन्त्यमेतत् ॥

३ अ ८। पा २। सू ८९ ॥

न क्त्वा सेट् । १ । २ । १८ ॥

नसेडित्यनेन कथं कित्त्वं क्रियेतेत्यत आह

[1]अकारेति ॥ (कै)

[2]विपरीतस्त्विति । (कै)

तथा हि सति ग्रथित्वेत्यादावपि कित्त्वं स्यादित्यर्थः ॥

न तु निर्वृत्तस्येति । (कै)

न चैवं क्त्वोऽपि विद्यमानस्य कित्त्वस्य कथं निषेध इति वाच्यम् । कार्य्यस्यैव निषेधो न तु विद्यमानकित्त्वस्येति न दोषः । आतिदेशिकस्य निर्वृत्तस्य निषेधे तु तेन कृतकित्कार्य्यस्यानेन प्रतिषेधे विरोधः स्पष्ट एवेति दिक् ॥ ननु यल्ग्रहणाभावेऽपि सिचश्चिण्वदिटि दृत्वे वृद्धावायादेशे च सिद्धमित्यत आह

[3]स्यासिति । (कै)

तत्र चिण्वद्भावे परत्वात् कृते इत्यन्वयः ॥

---

१ अकारप्रश्लेषः ॥

२ ग्रीडादिभ्य एव परा निष्ठा न किदिति नियमः । विपरीतस्तु निष्ठेवेति व्याख्यानान्न भवति ॥

३ स्यास् त्यातम् इति स्थिते इत्त्वं च प्राप्नोति चिण्वद्भावश्च तत्र परत्वाच्चिण्वद्भावे युक् च प्राप्नोति वृद्धिश्च तत्र वृद्ध्यपवादो युगागमः तत्र कृते यकारस्य इत्त्वप्रसङ्गः । न च पुनर्वृद्धिर्लभ्यते । पूर्वमेव युका बाधितत्वादिति भावः ॥

[1]वृद्ध्यपवादत्वादिति । (कै)

येन नाप्राप्तिन्यायेन न त्वनवकाशत्वेनेति भावः ॥ तदेवाह

न च पुनरिति ॥ (कै)

भाष्ये

[2]इत्त्वं कित्सन्नियोगेनेति । (भा)

उत्तरार्थत्वं खण्डयति । तदाह

आतिदेशिकस्यापीति । (कै)

तथा च कित्त्वनिषेधे तत्सन्नियुक्ते त्वस्याप्यभाव इति भावः ॥ ज्ञापितेत्वातिदेशिकानिषेधे उत्तरत्वाप्युपयोग इत्यन्यत् ॥ ननु "[3]अनो बहुव्रीहेः" इत्यस्य स्त्रियां विहितं नेत्यर्थाद् रेफस्यापि निवृत्तिर्वाचनिकीति विषमो दृष्टान्तोऽत आह

अन इति । (कै)

प्रत्ययाधिकारात् प्रत्ययस्यैव निषेध इति भावः ॥

[4]छग्रहणेनेति । (कै)

---

१ उपलब्धकैयटपुस्तके "वृद्ध्यपवाद" इति पाठोऽस्ति ॥

२ न सेडिति क्तेऽकित्त्वे निष्ठायामवधारणात् ।
ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ॥ १ ॥
इत्त्वं कित्सन्नियोगेन रेण तुल्यं सुधीवनि ।
वस्वर्थं किदतीदेशान्निग्रहीतिः क्वाच विग्रहात् ॥ २ ॥

३ अ ४ । पा १ । सू १२ ॥

४ विल्वकादिभ्यश्छस्य लुक् (६ । ४ । १५३) इत्यत्र छग्रहणेन ज्ञापितः ॥

तद्धि विल्वकादेरुत्तरस्य प्रत्ययस्य भनिमित्ते तद्धिते विधीयमानो लुक् प्रत्ययान्तराभावाय क्वस्येव सिद्ध इति क्वमात्रस्य लुप् यथा स्यात् न तु तत्सन्नियोगशिष्टकुको निवृत्तिरित्यर्थमिति भावः ॥ ननु युका वृद्धेर्बाधितत्वात् कथमिकारस्य वृद्धिरत आह

युगागमेनेति । (कै)

तत्प्राप्तिवेलायामिकाराभावेन तच्च वृद्धेरप्राप्तेरिति भावः । भ्रष्टावसरन्यायस्तु शास्त्रे नाख्येवेति तात्पर्यम् । वस्तुतो "ऽथवाऽस्त्वेवेत्तम्" इति भाष्यमेकदेशयुक्तिर्विन्मतोर्लुका टिलोपमात्रबाधवदचाप्यापत्तेरिति बोध्यम् । तस्माद् हल्ग्रहणस्य ज्ञापकत्वं स्थितम् औपदेशिकस्यैव निषेध इति ॥ भाष्ये

[1]आतिदेशिकमिति । (भा)

[2]"असंयोगाल्लिट्" इत्यनेन ॥

आजिवान् इति । (भा)

द्वित्वात् परत्वात् पूर्वमिटि न सेडितिनिषेधेन कित्त्वाभावान्नलोपाभावेऽसंयोगादित्यस्याप्राप्तेर्नलोपसिद्धये क्ङ्ग्रहणं संज्ञापेक्षाकृतं बहिरङ्गत्वं त्वत्र शास्त्रे नाश्रीयते इति भावः ॥

[3]एकादेशे [4]वस्वेकाजिति । (कै)

कृतद्विर्वचनानामेकत्वमिति स्थितत्वादिति भावः ॥

---

१ आतिदेशिकमत्र कित्त्वं भविष्यति ॥ २ अ १ । पा २ । सू ५ ॥

३ उपलब्धकैयटे "एकादेशे च" इति पाठोऽस्ति ॥

४ अ ७ । पा २ । सू ६७ ॥

नलोपनिवृत्ताविति। (कै)

निमित्तापायन्यायेनेति भावः॥

द्विहल्त्वादिति। (कै)

[1]"तस्मान्नुड्" इत्यनेन नुडिति भावः॥

इक्षिवृत्ताविति। (कै)

तन्निवृत्तौ सत्यां कित्त्वान्नलोपेऽद्विहल्त्वान्नुक्षिवृत्तावेकादेशेनैकाच्त्वादिटि सेट्त्वात् कित्त्वप्रतिषेध इत्येवं न लोपादीनां च क्रमप्राप्तिरित्यर्थः॥

इष्टत इति। (कै)

सा चौपदेशिककित्त्वेन नलोपे दृटः प्रवृत्ताविष्टसिद्धिरूपा इत्यर्थः। उक्तन्यायस्य भाष्यकृतानङ्गीकारेण चक्रकप्राप्तिरेव नेत्यन्ये॥ [2]"तितुत्र" इत्यादिना दृडागमप्रतिषेधः किं न स्यादत आह

अग्रहादीनामिति। (कै)

अतोदेशादित्यत्र [3]"उपसर्गस्य घञी"ति दीर्घः॥

---

१ अ ७। पा ४। सू ७१॥
२ अ ७। पा २। सू ९॥
३ अ ६। पा ३। सू १२२॥


[1]उदुपधाद्भावादिकर्मणोरण्यतरस्याम् । १ । २ । २१ ॥



श्नप इत्यस्य पञ्चम्यन्तत्वे गवन्तोदुपधात् परनिष्ठाऽसम्भव इत्यत आह

[2]श्नपः सम्बन्धीति ॥ (कै)

पूङः क्त्वा च । १ । २ । २२ ॥



नन्विटि वा प्रसङ्ग इत्यत्र सेट्प्रकरणादिति हेतुर्न्यूनोऽत आह

[3]अन्यतरस्यामिति चेति ॥ (कै)

ननु [4]"'अशकः किति" इति निषेधात् कित्त्वनिषेधं विनेडेव दुर्लभ इति सेडनुवृत्तिरयुक्तेत्यत आह

---

१ इह कस्मान्न भवति । गुधितः । गुधितवानिति । उदुपधाच्छपः । १ । भ्वादिकरणेभ्य इष्यते ॥

२ श्नपः सम्बन्धी भ्वादिकरणो यस्तस्मादित्यर्थः ॥

३ सेडिति अन्यतरस्यामिति चानुवर्त्तनात् सेटोरेव क्त्वानिष्ठयोः कित्त्वविकल्पः स्यात् ततश्च पुवित्वा पुवित इति पक्षे स्यात् । अस्ति चेडागमः पूङश्चेति विकल्पेनेड्विधानात् ॥ ४ अ ७ । पा २ । सू ११ ॥

अस्ति चेति ॥ (कै)

ननु मति "[1]पूङश्च" इत्यस्मिन् कथमकिदाश्रयं सेट्त्वमत आह

[2]इड्विधाविति ॥ (कै)

ननु गौरवाद्भारद्वाजीयमतमयुक्तमत आह

[3]लाघवमिति ॥ (कै)

[4]विभाषामध्ये इति । (भा)

---

१ अ ७। पा २। सू ५१ ॥

२ इड्विधौ "पूङश्च" (७। २। ५१) इति सूत्रं वार्त्तिककारः प्रत्याचष्टे तत्रानिटोरेव क्वानिष्ठयोरनेन कित्त्वं विकल्प्यते । तत्र यदा कित्त्वं तदा "श्रुकः किति" (७। २। १६) इति इट् प्रतिषेधात् पूत्वा पूत इति भवति यदा त्वकित्त्वं तदेड्गुणयोः पवित्वा पवित इति भवति ॥

३ लाघवमनादृत्य सूत्रकारेण "पूङश्च" (७। २। ५१) इतीड्विधौ पठितम्। इह तु विकल्पो नानुवर्त्तते उत्तरत्र वाग्रहणादिति सिध्यतीत्यमिति भावः ॥

४ इड्विधौ ह्यग्रहणम्। वा। इड्विधौ हि पूङो ग्रहणं न कर्त्तव्यम् भवति ॥ भारद्वाजीयाः पठन्ति। नित्यमकित्त्वमिडाद्योः क्वाग्रहणमुत्तरार्थम् ॥ नित्यमकित्त्वमिडाद्योः सिद्धम्। कथम्। विभाषामध्येऽयं योगः क्रियते विभाषामध्ये च ये विधयस्ते नित्या भवन्ति। किमर्थं तर्हि क्वाग्रहणम्। क्वाग्रहणमुत्तरार्थम्। उत्तरार्थं क्वाग्रहणं क्रियते "नोपधात्थफान्तादा" (१। २। २३) "वञ्चिलुञ्चृतश्च" (१। २। २४) इति ॥

विभाषयोर्मध्ये इत्यर्थः। किमर्थं तर्हि काश्यग्रहणमिति प्रश्नो भारद्वाजीयमते बोध्यः ॥ नन्विहार्थत्वे सम्भवति कथमुत्तरार्थत्वमत आह नक्रोति ॥ (कै)

---

[1]तृषिमृषिकृशेः काश्यपस्य । १ । २ । २५ ॥

---

[2]पारम्पर्य्यप्रतिपादनेनेति । (कै)

[3]"चातुर्वर्ण्यादि"त्वात् स्वार्थे ष्यञ् परम्पराप्रतिपादनेनेत्यर्थः ॥

---

१ काश्यपग्रहणं किमर्थम् । काश्यपग्रहणं पूजार्थम् । वेत्येव हि वर्त्तते ॥

२ शास्त्रस्य पूजापारम्पर्य्यप्रतिपादनेनानादित्वात् प्रामाण्यप्रतिपादनात् ॥ तृषपिपासायाम् । तृषित्वा । तर्षित्वा ॥ मृष तितिक्षायाम् । मृषित्वा । मर्षित्वा ॥ कृश तनूकरणे । कृशित्वा । कर्शित्वा ॥ न्यासग्रन्थे तु कृषविलेखने इति क्वाचित्कः प्रमादपाठः । अनिट्त्वात् ॥

३ ब्राह्मणादिषु चातुर्वर्ण्यादीनामुपसंख्यानम् । वा । अ ५ । पा १ । सू १२४ ॥

[1]रलो व्युपधाद्धलादेः संश्च । १ । २ । २६ ॥

वेत्यनुवृत्तेरुभयथापि विकल्पसिद्धेर्विचारोऽनुपपन्न इत्यत-स्तात्पर्य्यमाह

[2]किमिति ॥ (कै)

ननु क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन व्यापारादुभयत्र विभा-षासु प्रतिलब्धं लक्षणभेदादत आह

[3]एकरूपत्वेति । (कै)

व्यापारैक्ये सम्भवति तद्भेदाङ्गीकारो निष्फल इति भावः ॥

---

१ किमिदं रलः क्ङासनोः कित्त्वं विधीयत आहोस्वित्प्रतिषिध्यते । किं चातः । यदि विधीयते क्ङाग्रहणमनर्थकम् । किदेव हि क्ङा । अथ प्रति-षिध्यते सन्ग्रहणमनर्थकम् । अकिदेव हि सन् । अत उत्तरं पठति ।
*रलः क्ङासनोः कित्त्वम् । वा । रलः क्ङासनोः कित्त्वं विधीयते । ननु चोक्तं क्ङाग्रहणमनर्थकं किदेवहि क्ङेति । नानर्थकम् । नक्ङा सेट् (१ । २ । १८) इति प्रतिषेधः प्राप्नोति तद्बाधनार्थम् ॥

२ किमियमप्राप्ते विभाषा आहोस्वित्प्राप्त इति प्रश्नः । तत्राप्राप्तविभा-षायां सन एवाप्राप्तं कित्त्वं पक्षे विधीयत इति क्ङानुवृत्तिरनर्थिका । न हि तस्य कित्त्वं विधेयं सत एव भावात् । अथ प्राप्तविभाषा तदा क्ङः कित्त्वमस्तीति तस्यैव पक्षे निषेधः कर्त्तव्य इति सन्ग्रहणं न कार्य्यं तस्य कित्त्वमस्ति यत्पक्षे निषिध्यते ॥

३ अप्राप्तविभाषेयमेकेनैव रूपेण व्यवस्थितेत्यर्थः । एकरूपत्वप्रदर्शनाय च विचारः कृतः । न ह्युभयत्र विभाषा न सन्ति प्रतिलब्धं व्यापा-राश्रयणे तासां सिद्धत्वात् ॥

---

* रलः क्ङासनोः कित्त्वारम्भ (वा) इति पाठो बहुषु भाष्यपुस्तकेषु दृश्यते ॥

[1]ऊकालोऽज्झ्रस्वदीर्घप्लुतः । १ । २ । २७ ॥

भाष्ये

[2]प्रतिनिर्दिश्यत इति । (भा)

विशेष्यत इत्यर्थः ॥

---

१ ऊ इति त्रयाणां प्रश्लेषेण निर्देशः । तत्र न तावदन्ते माचिकः । विभाषा एष्ट प्रतिवचने हेः (८ । २ । ९३) इति हेः प्लुतविधानात् । नापि मध्ये । सुपि च (७ । ३ । १०२) इति दीर्घविधानात् ॥ द्विमात्रिकस्तु नान्ते । ओमभ्यादाने (८ । २ । ८७) इति प्लुतविधानात् । परिशेषादेकमात्र-द्विमात्र-त्रिमात्राणां क्रमः सिद्धः ॥ यत्तु "धित्वात्पूर्वं भवेद्ध्रस्वः प्लुतोऽन्ते सन्धितो मतः" इति मैत्रेयः । तद्भाष्यादर्शनान्न प्रयुक्तम् । यतः व्यत्यासे एकमात्रस्य ह्रस्वत्वं त्रिमात्रस्य प्लुतत्वमित्येव दुर्लभमिति भगवतैव दूषितम् ॥

२ अयुक्तोऽयं निर्देशः । ऊ इत्यनेन कालः प्रतिनिर्दिश्यत ऊ इत्ययं च वर्णः । तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम् । कथं तर्हि निर्देशः कर्त्तव्यः । ऊकालकाल इति । किमिदमूकालकाल इति । ऊ इत्येतस्य काल ऊकालः । *ऊकालः कालोऽस्य ऊकालकाल इति । स तर्हि तथा निर्देशः कर्त्तव्यः । न कर्त्तव्यः । उत्तरपदलोपोऽत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुखमिव मुखमस्योष्ट्रमुखः । खरमुखः । एवमूकालकाल इति । अथवा साहचर्य्यात्ताच्छब्द्यं भविष्यति । कालसहचरितो वर्णः । वर्णोऽपि काल एव ॥

---

* ऊकालः कालो यस्य स ऊकालकाल इति । बहुषु भाष्यपुस्तकेषु एवम्विधपाठोऽपि दृश्यते ॥

ऊकालः कालो यस्येति। (भा)

ऊकाल इव कालो यस्येत्यर्थः॥ ननूकालानां वर्णानां बहुत्वात् एकः संज्ञीत्यनुपपन्नमत आह

[1]ऊ इत्येकस्येति। (कै)

उपात्तद्विमात्रत्वाकारेणैक इति भावः॥

संज्ञिविशेषणस्येति। (कै)

ऊ इत्यस्येत्यर्थः॥

संज्ञानां चेति। (कै)

प्रदेशेषु त्रिविधव्यवहारदर्शनादिति भावः॥

सङ्घातानुदेश इति। (कै)

सङ्घातं सम्यक्ज्ञानमनतिक्रम्यानुदेशः सम्बन्ध इत्यर्थः। [2]"सुप्-सुपे"ति समासः। ज्ञानक्रमेणान्वय इति यावत्॥ नन्वेवमर्थतः समसङ्ख्त्वेऽपि शब्दतस्तदभावात् कथं "[3]यथासङ्ख्य"सूत्रप्राप्तिरत आह

[4]अर्थतश्चेति। (कै)

---

१ ऊ इत्येकस्यैव शब्दस्योच्चारणाद्भेदानवगमात् संज्ञिविशेषणस्यैकत्वे सति संज्ञिनोऽप्येकत्वात्। संज्ञानां च त्रित्वात् संख्यातानुदेशा-प्रसंङ्गः॥

२ अ २। पा १। सू ४॥ ३ अ १। पा ३। सू १०॥

४ अर्थतश्च साम्यं यथासंख्य (१। ३। १०) सूत्रे आश्रीयते न शब्दत एव॥

अत एव [१]"परस्मैपदानां णल्" इत्यादौ यथासङ्ख्यमिति भावः। ऊग्रब्दस्य त्रयोऽर्था इति तात्पर्य्यम्॥

[२]त्रयः शब्दा इति। (कै)

वैयाकरणैस्तथा सुज्ञेयत्वादिति भावः॥ भाष्ये [३]"विकारः" दीर्घरूपः। तेन "निर्देशः" इति तृतीयातत्पुरुषः। तदाह

---

१ अ ३। पा ४। सू ८२॥

२ अथवा शब्दतश्चास्याश्रयणेऽपि संहितावकाशादैक्यमिव प्राप्तास्त्रयः शब्दा उच्चारिता इत्यदोषः॥

३ ह्रस्वादिषु समसंख्याप्रसिद्धिर्निर्देशवैषम्यात्। वा। ह्रस्वादिषु समसंख्यत्वस्याप्रसिद्धिः। किं कारणम्। निर्देशवैषम्यात्। तिस्रः संज्ञा एकः संज्ञी। वैषम्यात् संख्यातानुदेशो (१। ३। १०) न प्राप्नोति॥ सिद्धं तु समसंख्यत्वात्। वा। सिद्धमेतत्। कथम्। समसंख्यत्वात्। कथं समसंख्यत्वम्। त्रयाणां हि विकारनिर्देशः। वा। त्रयाणामयं प्रश्लिष्टनिर्देशः। कथं पुनर्ज्ञायते त्रयाणामयं प्रश्लिष्टनिर्देश इति। तिस्रणां संज्ञानां करणसामर्थ्यात्। यद्यपि तावत्तिस्रणां संज्ञानां करणसामर्थ्याज्ज्ञायते त्रयाणामयं प्रश्लिष्टनिर्देश इति कुतस्त्वेतदेतेनानुपूर्व्येण संनिविष्टानां संज्ञा भविष्यन्तीति। आदौ मात्रिकस्ततो द्विमात्रस्ततस्त्रिमात्र इति। न पुनर्मात्रिको मध्ये वाऽन्ते वा स्यात्तथा द्विमात्र आदौ वाऽन्ते वा स्यात्तथा त्रिमात्र आदौ वा मध्ये वा स्यात्॥ अयं तावत्त्रिमात्रोऽशक्य आदौ वा मध्ये वा कर्त्तुम्। कुतः। प्लुताश्रयो हि प्रकृतिभावः प्रसज्येत (६। १। १२५)। मात्रिकद्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति (२। २। ३२) मात्रिकस्य पूर्वनिपातो भविष्यति॥ यत्तावदुच्यते। अयं तावत्त्रिमात्रोऽशक्य आदौ वा मध्ये वा कर्त्तुं प्लुताश्रयो हि प्रकृतिभावः प्रसज्येतेति। प्लुताश्रय-

प्रश्लिष्टेति ॥ (भा)

अनुमानादिति । (कै)

अनेकसंज्ञाकरणात् संज्ञिनां शब्दतो भेदावसाय इत्यर्थः । प्रयोगस्तु विमताः संज्ञाः भिन्नसंज्ञिविषयाः नानासंज्ञात्वादिति ॥ भाष्ये

प्लुताश्रय इति । (भा)

न च मध्ये करणे कथं प्लुताश्रयप्रकृतिभाव इति वाच्यम् मध्ये त्रिमात्रत्वे पूर्वेण दीर्घे त्रिमात्रस्यैवापत्तौ लोकाश्रयप्लुतत्वमादा-

---

प्रकृतिभावः प्लुतसंज्ञा चानेनैव । यदि च त्रिमात्र आदौ वा मध्ये वा स्यात् प्लुतसंज्ञैवास्य न स्यात् कुतः प्रकृतिभावः ॥ यदप्युच्यते मात्रिक द्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति मात्रिकस्य पूर्वनिपातो भविष्यतीति । ह्रस्वाश्रया हि घि संज्ञा (१ । ४ । ७) ह्रस्व संज्ञा चानेनैव । यदि च मात्रिको मध्ये वाऽन्ते वा स्याद्ह्रस्वसंज्ञैवास्य न स्यात् कुतो घि संज्ञा कुतः पूर्वनिपातः ॥ एवमेषा व्यवस्था न प्रकल्पते ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न मात्रिकोऽन्ते वा भविष्यतीति यदयं विभाषा एक प्रतिवचने हैः (८। २। ९३) इति मात्रिकस्य प्लुतं प्राप्नोति । कथं ज्ञात्वा ज्ञापकम् । योऽन्ते स प्लुतसंज्ञकः । यदि च मात्रिकोऽन्ते स्यात् प्लुतसंज्ञास्य स्यात् । तत्र मात्राकालस्य मात्राकालवचनमनर्थकं स्यात् । मध्ये तर्हि स्यादिति । अत्राऽप्याचार्यप्रवृत्तिर्ज्ञापयति न मात्रिको मध्ये भवतीति यदयम् "अतो दीर्घो यञि" "सुपि च" (७ । ३ । १०१-२) इति दीर्घत्वं प्राप्नोति । कथं ज्ञात्वा ज्ञापकम् । यो मध्ये स दीर्घसंज्ञकः । यदि च मात्रिको मध्ये स्याद्दीर्घसंज्ञास्य स्यात् । तत्र मात्राकालस्य मात्रा-

याग्निमेण सन्धौ कर्त्तव्ये प्रकृतिभावापत्तिः संख्या व्यवहार इव दीर्घादिव्यवहारोऽपि लौकिकशास्त्रीयोभयविषय इत्यभिमानः । तदाह

[१]लौकिकेति ॥ (कै)

[२]शास्त्रादिति । (कै)

लौकिकव्यवहारोऽप्यनादिशास्त्रसंस्कारपूर्वकः । अन्यथा संज्ञाकरणानर्थक्यमिति भावः ॥

[३]अनन्तरतमः । (कै)

उकारादिः ॥

न हीति । (कै)

कालवचनमनर्थकं स्यात् ॥ द्विमात्रस्तर्ह्यन्ते स्यादिति । अत्राऽप्याचार्यप्रवृत्तिर्ज्ञापयति न द्विमात्रोऽन्ते भवतीति यदयम् ओमभ्यादाने (८ । २ । ८७) इति द्विमात्रिकस्य प्लुतं शास्ति । कथं कृत्वा ज्ञापकम् । योऽन्ते स प्लुतसंज्ञार्थस्य स्यात् । तत्र द्विमात्राकालस्य द्विमात्राकालवचनमनर्थकं स्यात् ॥ मात्रिकेण चास्य पूर्वनिपातो बाधित इति कृत्वा क्वान्यत्रोत्सहते भवितुमन्यदतो मध्यात् ॥ एवमेषा व्यवस्था प्रकृता ॥ दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसंङ्गः । वा । दीर्घप्लुतयोरपि पूर्वसंज्ञा प्राप्नोति । का । ह्रस्वसंज्ञा । किं कारणम् । अण् सवर्णान् गृह्णातीति (१ । १ । ६९) ॥

१ लौकिकव्यवहाराश्रयणेन प्लुतत्वं ह्रस्वत्वं च सिद्धमाश्रित्यैतदुच्यते "अयं तावदिति" ॥

२ शास्त्रात् स्थितायां ह्रस्वादिव्यवस्थायां लोके ह्रस्वादिव्यवहारो नान्यथेति भावः ॥ ३ उपलब्धकैयटपुस्तके "अनन्तर" इति पाठोऽस्ति ॥

अवाधेनोपपत्तौ बाधा न युक्तेति भावः॥ घ्यन्तत्वात् पूर्वनिपातबाध इति न युक्तं प्रागुक्तयुक्तेरत आह

लिङ्गद्वयेनेति॥ (कै)

अणत्वादिति। (कै)

इदं जाति पक्षस्योपलक्षणम्॥ ननु ह्रस्वसंज्ञावद्दीर्घप्लुतसंज्ञे अपि त्रयाणां स्यातामिति संज्ञात्रयकरणं व्यर्थमत आह

द्विमात्रेत्यादि॥ (कै)

अनणत्वादिति। (कै)

यद्वाधिक्येन व्यापकजात्यविवक्षणाच्चेत्यपि बोध्यम्॥ नन्वेवं पञ्चानां संज्ञित्वाद्यथासंख्यभङ्ग इति चेन्न। शब्दसाम्येनादोषात्॥ भाष्ये

[1]सिद्धं त्ववस्थिता इति। (भा)

---

१ सिद्धन्तु तपरनिर्देशात्। वा। सिद्धमेतत्। कथम्। तपरनिर्देशः कर्त्तव्यः। उदूकाल इति। यद्येवं द्रुतायां तपरकरणे मध्यविलम्बितयोरुपसङ्ख्यानं कालभेदात्॥ द्रुतादिषु चोक्तम्। वा। किमुक्तम्। सिद्धन्त्ववस्थिता वर्णा वक्तुश्चिराचिरत्ववचनादुच्चत्तयो विशेष्यन्त इति। (तपरस्तत्कालस्य (१। १। ७०) इति सूत्रव्याख्यानावसरेऽप्येतदेवोक्तं भगवता)॥ स तर्हि तपरनिर्देशः कर्त्तव्यः। न कर्त्तव्यः। इह कालग्रहणं क्रियते यावच्च तपरकरणं तावत् कालग्रहणम्। प्रत्येकं च कालशब्दः परिसमाप्यते। उकाल ऊकाल ऊ ३ काल इति॥ अथवा एकसंज्ञाधिकारेऽयं योगः कर्त्तव्यः (आकडारादेका संज्ञा। १। ४। १)॥ तचैका संज्ञा भवति या परानवकाशा चेत्येवं हि

द्रुतत्वाद् [१]"अपो भि" व्यक्तिगता एवेति भावः ॥ ननु [२]"तपरस्तत्कालस्य" इतिवत्कालपरः "तत्कालस्य" इति सूत्राभावात् कथं समत्वमत आह

एकेति ॥ (कै)

तदेवोपपादयति

[३]ऊ अजिति । (कै)

किं चैवमुकाराणामेव संज्ञित्वेन संज्ञाविधानवैयर्थ्यापत्तिः ॥

अपि तु तैरजिति । (कै)

अत्र च मुख्यसामानाधिकरण्ये उक्तदोषात्लक्षणया सामानाधिकरण्यं दर्शयति ।

तत्रेति । (कै)

दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यति ॥ अथवा "स्वं रूपं शब्दस्याशब्दसंज्ञा" (१ । १ । ६८) इत्ययं योगः प्रत्याख्यायते । तत्र यदेतद्शब्दसंज्ञेत्येतद्या विभक्त्या निर्दिश्यमानमर्थवद्भवति तया निर्दिश्यमुत्तरत्रानुवर्त्तिष्यते । "अणुदित्सवर्णस्य चाप्रत्ययः" (१ । १ । ६९) अशब्दसंज्ञायामिति ॥

१ अपोभि । ७ । ४ । ४८ । अपोभि मासश्छन्दसि । वा । अपोभीत्यत्र मासश्छन्दस्युपसङ्ख्यानं कर्त्तव्यम् । माद्भिरिडा इन्द्रो वृत्रहा ॥ अत्यल्पमिदमुच्यते । स्वस्रतवसोर्मास उषसश्च त इष्यते । स्वद्भिः । स्रतवद्भिः । समुषद्भिरजायथाः । माद्भिरिडा इन्द्रो वृत्रहा ॥

२ अ १ । पा १ । सू ७० ॥

३ ऊ अज् इत्येव कालार्थो लभ्यते । उकारादयो ह्यचत्वं न व्यभिचरन्तीति नाच्त्वेन ते विशेष्यन्ते अपि तु तैरच् ॥

तत्र सादृश्यान्तरासम्भवाद्व्याख्यानाच्च कालकृतस्यैव तस्य ग्रहणमिति भावः॥

[१]हलां त्विति। (कै)

ग्रिचादावचामेव स्वरकथनादिति भावः। प्रत्याहारेषु जातिपक्षाश्रयणान्न दोष इति तात्पर्य्यम्॥ ननु ह्रस्वसंज्ञाह्रस्वविधायकेषु एकमात्रादीनां त्रयाणामपि ग्रहणार्था स्यादित्यत आह

त्रयाणां चेदिति॥ (कै)

अन्तरतमेति। (कै)

प्रमाणत इति शेषः॥

ह्रस्वप्रदेशेष्वज्ग्रहणमिति। (कै)

न च विधौ ह्रस्वग्रहणे त्रयाणां विधानम्। अजग्रहणे तु एकस्यैव विधीयमानत्वेन सवर्णग्राहकत्वादिति विशेष इति वाच्यम्। विधीयमानेनापि क्वचित् सवर्णग्रहणादित्यभिमानः॥ अनुवादे तु उभाभ्यामपि त्रयाणां ग्रहणेनाज्ग्रहणमेव कार्य्यमिति भावः॥ भाष्ये

[२]ननु चेदमिति। (भा)

---

१ हलां त्वयोग्यत्वात्तदभावः॥

२ अथवा ह्रस्वसंज्ञावचनसामर्थ्याद्दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यति। ननु चेदं प्रयोजनं स्यात् संज्ञयाविधाने नियमं वक्ष्यामीति (संज्ञया विधाने नियमः। वा। १। २। १८) ह्रस्वसंज्ञया यदुच्यते तदचः स्थाने यथास्यादिति। स्यादेतत्प्रयोजनं यदि किञ्चित्कराणि ह्रस्वशासनानि स्युः। यतस्तु खलु यावदज्ग्रहणं तावद्ह्रस्वग्रहणमतोऽकिञ्चित्कराणि ह्रस्वशासनानि॥ इदं तर्हि प्रयोजनम् "एच इग्घ्र-

ह्रस्वप्रदेशेष्वज्ग्रहणे [1]"अचश्च" इति नियमाभावाद् हलामप्यादेशः प्राप्नोति इति भावः॥ परिहरति

स्यादेतदिति॥ (भा)

किञ्चित्कराणि। (भा)

किञ्चिदिशेषकराणि। न वाऽस्ति कश्चिद्ह्रस्वविधाने विशेषः। अन्तरतमपरिभाषया माचिकस्थाने माचिकस्य द्विमाचिकस्थाने द्विमाचिकस्यैव विधानादिति भावः॥ न च अनन्तरतमादेशविधानार्थं तद्बाधकल्पनापेक्षयेष्टानुरोधेन तयोर्ह्रस्वसंज्ञाभावज्ञापनस्यैवौचित्यमिति भावः॥

यावदज्ग्रहणमिति। (भा)

प्रयोगे यत्परिमाणकाजुच्चारणमित्यर्थः॥

तावद्ह्रस्वग्रहणमिति। (भा)

तत्परिमाणकस्यैव ह्रस्वशब्देन ग्रहणं विधानमतस्तानि व्यर्थान्येव इत्यर्थः॥ ये तु ह्रस्वविधायकेष्वज्ग्रहणमेव कार्यमित्येतद्भाष्याशयं वर्णयन्ति तेषां संज्ञया विधाने नियममित्यादेः समाधिरयं कथमिति चिन्त्यम्॥

स्यादेशे" (१। १। ४८) इति वक्ष्यामीति। अनुच्यमाने ह्येतस्मिंस्ह्रस्वप्रदेशेष्वेच इग्भवतीति वक्तव्यं स्यात्। "क्रसो नपुंसके प्रातिपदिकस्य" (१। २। ४७) एच इग्भवतीति। "गौ चडुपधाया ह्रस्वः" (७। ४। १) एच इग्भवतीति। "ह्रस्वः" "ह्रलादिः शेषः" (७। ४। ५९–६०) एच इग्भवतीति॥

१ अ १। पा २। सू २८॥

[1]षड्ग्रहणानीति । (भा)

भाष्यस्य चोपपत्तिः चिन्त्येति दिक् । अनुवादे तु ह्रस्वग्रहणाज्ग्रहणयोः समतैवेति एतदर्थद्वयबोधनार्थमेवेदृग्विशिष्टग्रब्दोपादानं भाष्ये इति बोध्यम् ॥

लाघवोपलक्षणपरमिति । (कै)

केचित्तु एतत्सूत्रस्थेतद्भाष्यप्रामाण्यात् "[2]कमेर्णिङ्" इति सूत्रे "[3]चिण्मुलोः" इति सूत्रस्थदीर्घग्रहणस्येतदिदानीं प्रयोजनं यद्दीर्घविधौ स्थानिवत्त्वनिषेध इति वदतो भाष्यकारस्य प्रामाण्याच्च "चिण्मुलोः" इति सूत्रस्थभाष्याच्च हेड् वेष्टने इति धातोर्घटादावस्माद्दायिकः पाठः ॥ परमनुमन्य इत्यादिस्थेतद्भाष्यप्रमाण्यादनभिधानमिति यथाश्रुतं भाष्यमेव सम्यगित्याहुः ॥ पुंलिङ्गैकवचनदर्शनाद् द्वन्द्वानुपपत्तिमाशङ्क्याह

सौचत्वादिति ॥ (कै)

लिङ्गस्य लौकिकत्वात्तद्व्युत्पत्त्य उचितो न तु शास्त्रीयैकवचनस्येति भावः ॥

---

१ संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । लघीयस्त्वं चिर्ह्रस्वप्रदेशेष्वेव इग्भवतीति न पुनः संज्ञाकरणम् । चिर्ह्रस्वप्रदेशेष्वेव इग्भवतीति षड्ग्रहणानि । संज्ञाकरणे पुनरयौ । ह्रस्वसंज्ञा वक्तव्या । चिर्ह्रस्वप्रदेशेषु ह्रस्वग्रहणं कर्त्तव्यं ह्रस्वो ह्रस्वो ह्रस्व इति । एच इग् ह्रस्वादेश इति । सोऽयमेव लघीयसा न्यासेन सिद्धे यद्गरीयांसं यत्नमारभते तस्येतत्प्रयोजनं दीर्घप्लुतयोस्तु पूर्वसंज्ञामाभूदिति ॥

२ अ ३ । पा १ । सू ३० ॥ ३ अ ६ । पा ४ । सू ९३ ॥

अचश्च । १ । २ । २८ ॥

भाष्ये

[1]अलोऽन्त्यस्य विधयो भवन्ति । (भा)

इत्यनेन तस्य व्यापकत्वं बोधितं तेनैतत् प्रवृत्त्यभावेऽपि स्थानषष्ठीरूपालिङ्गाद् [2]"दिव उद्" इत्यादौ [3]"अलोऽन्त्यस्य" इत्यस्य प्रवृत्तिः सुचिता ॥ एकवाक्यतां दर्शयति

अच इति ॥ (भा)

आदिप्रभृतिशब्दयोः पौनरुक्त्यं परिहरति

[4]प्रभृतीति । (भा)

---

१ किमयमलोऽन्त्यादेश आहोस्विदलोऽन्त्यापवादः (१ । १ । ५२) । कथं चायं तच्छेषः स्यात् कथं वा तदपवादः । यद्येकं वाक्यं तच्चेदं च अलोऽन्त्यस्य विधयो । भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्येति ततोऽयं तच्छेषः । अथ नानावाक्यम् अलोऽन्त्यस्य विधयो भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्यानन्त्यस्य चेति ततोऽयं तदपवादः ॥

२ अ ६ । पा १ । सू १३१ ॥ ३ अ १ । पा १ । सू ५२ ॥

४ कस्मात्र विशेषः । ह्रस्वादिविधिरलोऽन्त्यस्येति चेद्वचिप्रच्छिश्रमादिप्रभृतिहनिगमिदीर्घ्वज्ग्रहणम् । वा । ह्रस्वादिविधिरलोऽन्त्यस्येति चेद्वचिप्रच्छिश्रमादिप्रभृतिहनिगमिदीर्घ्वज्ग्रहणं कर्त्तव्यम् । वचिप्रच्छ्योर्दीर्घाऽ(वचिप्रच्छ्यायतस्तुकटप्रजुश्रीणां दीर्घश्च । (३ । २ । १७८) वचिप्रच्छ्यायतस्तुकटप्रजुश्रीणां दीर्घत्वं च वक्तव्यं क्विप् च ।

[1]"आदि" पदं तु [2]"ग्रमामष्टानाम्" इति सूत्रस्थवद्भवचनानुवादकमिति भावः ॥

[3]यदा त्विति । (कै)

इदं चिन्त्यम् । प्रत्ययस्याङ्गांग्र एवोत्थिताकाङ्क्षत्वात् ॥

नाचमिति । (कै)

ह्रस्वादिसंज्ञका अचोऽचः स्थाने इति नार्थ इति भावः ॥

स्वयमिति । (कै)

अच् पदेनैवेत्यर्थ आश्रितः स्वरूपस्य शब्दस्य व्यापारो यैरित्यर्थस्तदाह

ह्रस्व इत्येवमिति ॥ (कै)

ननुमाचिकानां हलामुपदेशाभावादसत्त्वेन संज्ञाभावमाशङ्क्याह

वचि । वाक् । वचि ॥ प्रच्छि । शब्दप्राट् । प्रच्छि ॥ आयतस्तु । आयतस्तूः । आयतस्तु ॥ कटप्रु । कटप्रूः । कटप्रु ॥ जु । जूः ॥ श्रि । श्रीः ॥) च इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥ हनिगम्योर्दीर्घोऽ(नधिकार उक्तम् । वा । किमुक्तम् । हनिगमिदीर्घेष्वज्ग्रहणमिति । नैष दोषः । उक्तमेतद्ह्रस्वो दीर्घः प्लुत इति) च इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥

१ ह्रस्वादिविधिरलोऽन्त्यस्येति चेदचिप्रच्छिग्रमादिप्रभृतिहनिगमिदीर्घेष्वज्ग्रहणम् इति वार्त्तिके ॥

२ अ ७ । पा ३ । सू ७४ ॥

३ "यकारादौ यदङ्गं तस्य योऽवयवोऽजित्येवमत्र प्रसङ्गः । यदा त्वजेव यकारादिना विशेष्यते तदात्र व्यवधानान्नास्ति प्रसङ्गः । एवमन्यत्रापि ज्ञेयम्" इति कैयटेनोक्तम् ॥

यथेति ॥ (कै)

[1]वा तुकीति । (कै)

वैकल्पिके तुकीति यावत् ॥

[2]विरोधादिति । (कै)

तथा च विकल्पविधिप्रवृत्तेर्वैयर्थ्यापत्त्या नित्यस्य बाध एवेत्यर्थः ॥ क्व तर्हि पुनः प्रसङ्गविज्ञानं तत्राह

यत्र हीति । (कै)

यथा "भिन्धकी" त्यत्र परत्वात् धौक्तते पुनः प्रसङ्गविज्ञानादकच् । न हि तत्राकच् धिप्रवृत्त्योर्विरोधः ॥

समुदाये वेति । (कै)

इदं चिन्त्यं बहुत्रो दृष्टत्वात् ॥ व्यक्तिद्वारकपरिमाणासम्भवं प्रकृते आह

---

१ परत्वाद्दू दीर्घलक्षणे वा तुकि सति सकृद्गतौ विप्रतिषेध इति न्यायाद् ह्रस्वलक्षणः पुनर्न प्रवर्त्तते ॥

२ न चैवं विधेर्विषये पुनः प्रसङ्गविज्ञानमस्ति । नित्यविकल्पयोर्विरोधात् । पूर्वेण परस्य बाधप्रसङ्गात् । यत्र हि पूर्वो विधिः परं न बाधते तत्र पुनः प्रसङ्गविज्ञानं क्वचिद् आश्रीयते । समुदाये वा कार्य्यं प्रति व्याप्रियमाणे अवयवानां पारतन्त्र्यादव्यापाराद्भेव ह्रस्वलक्षणतुक् प्रसङ्गः । ननु क्रियमाणेऽप्यजग्रहणे वर्णग्रहणे जातिग्रहणादच् समुदायस्यापि दीर्घसंज्ञाप्रसङ्गः । नैष दोषः । उकाल इति विशेषणादिह व्यक्तिराश्रीयते ॥

[1]एकैकेति । (कै)

द्विमात्राकालिकव्यक्तिगताच्चजातिर्दीर्घ इति हि अर्थः स्यात् । तत्र या व्यक्तिः प्रत्येकरूपा न सा द्विमात्रकाला या च तादृग्री न सा व्यक्तिरिति भावः । [2]"हलन्ताच्च" इत्यादौ तु इक् समीपव्यक्तिवृत्तिर्हल्चजातेः पर इत्यर्थान्न धिष्णतीत्यादौ दोषः । जातेर्हि जात्यन्तरव्यवधायकमिति न सजातीयद्वितीयव्यक्तिर्व्यवधायिकेति बोध्यम् । परे तु वर्णाद्वर्णान्तरोच्चारणेऽर्धमात्राकालस्य सत्त्वेन वर्णसमुदाये मात्राकालिकत्वाद्यसम्भव इति प्रश्नो भाष्ये ।

अथ पूर्वेति । (भा)

उत्तरन्तु तावत्सूक्ष्मकालग्रहणासमर्थस्य तत्र संज्ञाप्रवृत्तिशङ्कावारणार्थमित्याशयेन । एवं च जातिग्रहणमित्यस्य जात्याश्रयानेकव्यक्तिग्रहणमित्यर्थेऽपि न दोषः । मात्राकालोऽवग्रहोऽर्धमात्राकालोऽवग्रह इति प्रातिशाख्ययोरविरोधाय [3]"परः सन्निकर्षः" इति सूत्रस्थं भाष्येण च वर्णाद्वर्णान्तरोच्चारणेऽर्धमात्राकालव्यवायस्यावश्यकत्वाद् इत्याहुः ॥

---

१ न हि जातेः परिमाणमस्ति । व्यक्तिद्वारकं वा जातेः परिमाणमाश्रीयते । एकैकव्यक्तिव्यङ्ग्या हि जातिर्न समुदायव्यङ्ग्या ॥

२ अ १ । पा २ । सू १० ॥

३ अ १ । पा ४ । सू १०९ ॥

(उच्चैरुदात्तः । १। २। २९ ।) (अ. १। पा. २। आ. १)
(नीचैरनुदात्तः । १। २। ३० ।)

[१]उच्चैरुदात्तः । १। २। २९ ॥

नीचैरनुदात्तः । १। २। ३० ॥

नन्वच इत्यनुवृत्तावपि कथं परिभाषाऽप्रकृतिः । अनुवृत्तस्य प्रकृतसूत्रेष्वपेक्षितसंज्ञिसमर्पकत्वेऽपि स्वरोऽच एव स्थाने इत्यर्थकत्वे मानाभावादत आह

---

१ किं षष्ठीनिर्दिष्टमजग्रहणमनुवर्त्तत उताहो न (१ । २ । २७)। किं चातः । यद्यनुवर्त्तते हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदित्येषा* परिभाषा न प्रकल्प्यते । कथं हलो नाम स्वरप्राप्तिः स्यात् । एवं तर्हि निवृत्तम् । बह्वन्येतस्याः परिभाषायाः प्रयोजनानि । अथ प्रथमानिर्दिष्टमजग्रहणमनुवर्त्तते उताहो न । †किं चार्थोऽनुवृत्त्या । वाढमर्थो यद्येते व्यञ्जनस्यापि गुणा लक्ष्यन्ते । ननु च प्रत्यक्षमुपलभ्यन्ते । ‡"इषेत्वोर्जेत्वा" (यजुः-वा-संहि-माध्य-शा-१-१-१) । नैते व्यञ्जनस्य गुणाः । §अच एते गुणास्तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते । तद्यथा । द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते। बदरपिटके रिक्तको लोहकंसस्तद्गुणमुपलभ्यते ॥ कुतो नु

---

* "भवतीत्येषा" इति पाठोऽपि भाष्ये दृश्यते ॥

† "कस्यार्थोनुवृत्त्या" इत्यपि भाष्ये ॥

‡ अग्निमीले पुरोहितम् (ऋक् संहि १अ-१अ-१सू-१ऋ) अग्नया याहि वीतये (सामसंहि १प-१अ-१ख-१ऋ) इति । इत्यधिकपाठोऽपि दृश्यते ॥

§ "किं त्वच एव" इति पाठो बह्वीषु भाष्यपुस्तकेषु अस्ति ॥

उच्चैरिति । (कै)

संज्ञिसमर्पणस्य प्रथमान्तानुवृत्त्यापि सिद्धेरितिः भावः ॥

स्थाने । (कै)

तालवादौ ॥ "उच्चैः" उच्चदेशे उपलभ्यमान इत्यन्वयः ॥

उपलभ्यमानः । (कै)

व्यजमानः ॥

स च चाच इति । (कै)

वाक्यभेदेन षष्ठ्यन्ताच् पदेन सम्बन्ध इति भावः ॥ नन्वच् ग्रहणानुवृत्त्यैव सिद्धे मास्तु परिभाषाप्रवृत्तिरत आह

खल्वेतदच एते गुणा*स्तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यत †इति न पुनर्व्यञ्जनस्यैते गुणाः स्युस्तत्सामीप्यात्त्वजपि तद्गुण उपलभ्यत इति । अन्तरेणापि व्यञ्जनमच एवैते गुणा लक्ष्यन्ते न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति । अन्वर्थं खल्वपि निर्वचनम् ।

स्वयं राजन्ते स्वरा अन्वग् भवति व्यञ्जनमिति ॥

उच्चनीचस्यानवस्थितत्वात् संज्ञाऽप्रसिद्धिः । वा । इदमुच्चनीचमनवस्थितपदार्थकम् । तदेव हि किञ्चित्यत्युच्चैर्भवति किञ्चित्यतिनीचैः । ‡एवं कञ्चित् कञ्चिदधीयान आह किमुच्चै रोरूयसेऽथ नीचैर्वर्त्ततामिति । तमेव तथाधीयानमपर आह किमन्तात्तिकेनाधीष उच्चैर्वर्त्ततामिति । एवमुच्चनीचमनवस्थितपदार्थकं तस्यानवस्थानात्

---

* "गुणाः स्युः" इति पाठोऽपि दृश्यते ॥

† "इति" इति नास्ति षऊपु पुस्तकेषु ॥

‡ "एवं हि कञ्चित् कं चिद्" इति पाठोऽपि दृश्यते ॥

(उच्चैरुदात्तः । १। २। २९ ।) (अ. १। पा. २। आ. १)
(नीचैरनुदात्तः । १। २। ३० ।)

[1]सत्यामिति । (कै)

"समासस्य" (६ । १ । २२३) इत्यत्राच इत्यस्योपस्थित्या तेन समासे विधेयमाणे [2]"राजदृशद्" इत्यादौ न स्यादित्यर्थः ॥

षकाराकारस्येति । (कै)

तथा च तन्सिद्ध्यर्थं परिभाषैव कर्त्तव्या नाच इत्यनुवृत्तिरिति भावः । तदाह भाष्ये

बहुन्येतस्या इति ॥ (भा)

संज्ञाया अप्रसिद्धिः ॥ एवं तर्हि लक्षणं करिष्यते । आयामो दारुण्यमशुता खस्येत्युच्चैः कराणि शब्दस्य । आयामो गात्राणां निग्रहः । दारुण्यं खरस्य दारुणता रूक्षता । अशुता खस्य कण्ठस्य संवृतता । उच्चैः कराणि शब्दस्य । *अथ नीचैः कराणि शब्दस्य । अन्ववसर्गो मार्दवमशुता खस्येति नीचैः कराणि शब्दस्य । अन्ववसर्गो गात्राणां शिथिलता । मार्दवं खरस्य मृदुता स्निग्धता । अशुता खस्य महत्ता कण्ठस्य । इति नीचैः कराणि शब्दस्य ॥ एतदप्यनैकान्तिकम् । यदल्पप्राणस्य सर्वोच्चैस्तन्महाप्राणस्य सर्वनीचैः ॥

सिद्धं तु समानप्रक्रमवचनात् । वा । सिद्धमेतत् समाने प्रक्रम इति वक्तव्यम् । कः पुनः प्रक्रमः । उरः कण्ठः शिर इति ॥

१ सत्यामच इत्यस्यानुवृत्तौ समासस्य (६ । १ । २२३) इत्यन्तोदात्तत्वं राजपुरुष इत्यादावेव स्यात् न तु राजदृशद् इत्यादौ षकाराकारस्य ॥

२ समासान्तोदात्तत्वे व्यञ्जनान्तेषूपसंख्यानम् (वा । ६ । १ । २२३) इति वार्त्तिकव्याख्यानावसरे "राजदृशद् ब्राह्मणसमित्" इत्युक्तं भगवता ॥

---

* "अथ नीचैः कराणि शब्दस्य" इति पाठो नास्ति बहुषु पुस्तकेषु ॥

(उच्चैरुदात्तः। १। २। २९।)
(नीचैरनुदात्तः। १। २। ३०।)

[1]यतोऽनाव् इति। (पा)

यदन्तस्य ङ्याप्प्रातिपदिकस्यादिरुदात्त इति तदर्थः॥

[2]यावतेति। (कै)

न वाऽचः स्थाने हलण्युदात्तादिग्रहणेन प्रत्यापितः स्यादिति वाच्यम्। अन्तरतमपरिभाषयाऽप्राप्तेः॥ ननु स्वरशेषाया अविद्यमानवत्परिभाषाया अन्यत्राऽप्राप्तेस्तत्र दोषोऽत आह

[3]अनुदात्तादेरिति॥ (कै)

[4]स्वत एव (कै)

इत्यस्याचां वैस्वर्य्यवत्तेषामनुदात्तत्वमेवेति विशेषस्वराप्राप्त्या स्वर एवावतिष्ठते इत्यर्थः॥ ननु स्वतस्तथात्वकल्पने मानाभावः। किं

---

१ एषा च परिभाषा "यतोऽनाव" (६। १। २१३) इत्यत्र "अनाव" इति प्रतिषेधेन ज्ञापिता। अन्यथा नाद्यमित्यत्र नकारस्यायोग्यत्वादाकारस्य चानादित्वादुदात्तत्वं न भविष्यतीति किमनाव इति प्रतिषेधेन। एतदेवोक्तं भगवता। "सा तर्ह्येषा परिभाषा कर्त्तव्या। न कर्त्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं "यतोऽनावः" (६। १। २१३) इति नावः प्रतिषेधं प्राह्लि"॥

२ यावता यत्र स्वरो विधीयते तत्र व्यञ्जनस्याविद्यमानत्वादच एव भविष्यत्यनुदात्तादेरञ् इत्यादावनुवादेऽपि न दोषः॥

३ अ ४। पा २। सू ४४।

४ स्वत एव हलोऽनुदात्तत्वं भवतु अजुपरागवशाद्वा तदनुवादेन कार्य्यविधाने न कश्चिद्विशेषः। एवं तर्हि न्यायव्युत्पादनार्थ एवायं विचारः॥

(उच्चैरुदात्तः । १। २। २९ ।) (अ. १। पा. २। आ. १)
(नीचैरनुदात्तः । १। २। ३० ।)

चोदात्तसमवधानेऽप्यनुदात्तत्वप्रतीत्यापत्तिरेवं च हलादिप्रातिपदिके आद्युदात्तेऽप्यन्नापत्तिरत आह

अजुपेति ॥ (कै)

न्यायेति । (कै)

उदात्तत्वादीनामज्धर्मविषयकन्यायेत्यर्थः ॥ भाष्येऽनुवृत्तेः प्रयोजनाभावात् सन्देहानुपपत्तिरिति पृच्छति

किं चेति । (भा)

अनुवृत्तेः फलमित्यर्थः ॥ भाष्ये यदि लक्ष्यन्ते तदार्थः । यतो न लक्ष्यन्ते अतो नार्थ इत्यन्वयः ॥ ननु इयं प्रतीतीरक्तस्फटिकप्रतीतिवत् भ्रान्तेत्यत आह

[1]बाधकेति ॥ (कै)

प्रतीतिर्भ्रान्तिरेवेत्याह

नैते इति (भा)

भाष्ये ॥ तद्व्याचष्टे

[2]अन्यथाऽपीति ॥ (कै)

रिक्तको लोहकंसः । (भा)

आदर्शः रिक्तकः । घर्षणेन उज्ज्वलीकृतः ॥ "वदरपिटकं" वदरफलयुक्तपेटिकेति सम्प्रदायः प्रतीतेर्भ्रान्तित्वे बीजं पृच्छति

कुतो न्विति ॥ (भा)

अजन्वयव्यतिरेकौ बीजमित्याह

---

१ बाधकाभावाच्च भ्रान्त्यसिद्धिः ॥ २ अन्यथाऽप्युपालम्भोपपत्तेरिति भावः ॥

अन्तरेणापीति ॥ (भा)

[1]अच ह्रीति । (कै)

[2]"निपाता आद्युदात्ताः" [3]"तिङतिङ" इत्याभ्यामिति भावः ॥

न पुनरन्तरेणेति । (भा)

अन्वयप्रदर्शनम् इदं प्रक्रियाप्राप्तातिरिक्तविषयं सौचप्रयोगातिरिक्तविषयकं च बोध्यम् ॥

स्वयं राजन्त इति (भा)

भाष्यस्योदात्तादिगुणैरित्यर्थः ॥

अनुगच्छतीति । (कै)

अज्गुणमिति शेषः ॥

न त्वच वर्णसादृश्यमिति । (कै)

निर्वचनं हि तच्च धात्वर्थयोगेनार्थाभावेऽपि वर्णसादृश्येन वा इत्याशयः ॥ अर्थयोग एवास्तीत्याह

अथवेति ॥ (कै)

---

१ अच ह्याकार उदात्तस्तिङन्तस्य निघातः । ततश्चान्वयव्यतिरेकाभ्यामच एवैते गुणाः । यदि तु हलामप्येते गुणा अभविष्यन् तदा हलामचां च भिन्नस्वरताप्युपालक्ष्यत यस्मात्त्वचामेव स्वरमनुविदधति न हलः । तस्मान्न हलां स्वयं स्वरोऽस्तीति निश्चयः ॥

२ निपाता आद्युदात्ताः (फिट् सूत्रम् ८०) । स्वाहा ॥

३ तिङतिङः । ८ । १ । २८ । अतिङ इति किमर्थम् । पचति । करोति ॥ अतिङ् वचनमनर्थकं समानवाक्याधिकारात् । वा । अतिङ्वचनमनर्थकम् । किं कारणम् । समानवाक्याधिकारात् । समानवाक्य (वा । ८ । १ । १८) इति वर्त्तते न च समानवाक्ये द्वे तिङन्ते स्तः ॥

(उच्चैरुदात्तः । १। २। २९ ।) (अ. १। पा. २। आ. १)
(नीचैरनुदात्तः । १। २। ३० ।)

विविधमिति । (कै)

उदात्तत्वादिरूपनानाप्रकारगमनमजधीनमितिशब्दादेव लभ्यत इति भावः ॥

पर्य्यायेति । (कै)

यो हि यमनुगच्छति स तद्वद्विविधं गच्छतीत्यर्थः ॥ ननु विरुद्धस्वरद्वयमध्यगतस्य व्यञ्जनस्य स्वरद्वयानुरागापत्तिरत आह

उपरागश्चेति ॥ (कै)

स्वभाव एवात्र बीजम् अधिकरणशक्तिप्रधानत्वात् कथमयं पर्य्यनुयोगोऽत आह

श्रुतीति । (कै)

उच्चैः श्रूयमाण उदात्तादिरर्थ इत्यभिमानः ॥ नन्वस्यनवस्थितत्वं को दोषोऽत आह

न चेति ॥ (कै)

भाष्ये

एवं तर्हि लक्षणमिति[1] । (भा)

न श्रुतिगतप्रकर्षाश्रयमुच्चत्वं नीचत्वं वा किन्तु ईदृशज्ञापकज्ञापितमिति भावः ॥

[1]श्रोता हीति । (कै)

---

१ श्रोता हि वक्तृगतानायामादीन् धर्मान् कार्य्यादवस्यति कार्य्यं च संकीर्णम् । तथा हि महाप्राणो नीचैरप्युच्चारयन् स्वरेण महान्तं देशं व्याप्नोति । अल्पप्राणस्तूच्चैरपि वदन्नल्पं देशं व्याप्नोति ॥

(अ. १। पा. २। आ. १) (उच्चैरुदात्तः । १। २। २९ ।)
(नीचैरनुदात्तः । १। २। ३० ।)

आयामादीनां श्रुतिप्रकर्षानुमेयत्वात् तस्य चाव्यवस्थितत्वादव्यवस्थितत्वमिति भावः ॥

[1]प्रक्रम्यन्ते इति । (कै)

अधिकरणे घञि [2]"नोदात्तोपदेशस्य" इति वृद्धि प्रतिषेधः ॥

[3]ऊर्ध्वभागेनेति । (कै)

ऊर्ध्वभागावच्छिन्नवायुसंयोगेनेत्यर्थः ॥ न चेदमपूर्वं कर्त्तव्यमित्याह

[4]एवं चेति । (कै)

करणस्य चाधिकरणविवक्षा बोध्या । कस्योर्ध्वभागे इत्याकाङ्क्षायां योग्यतया स्थानस्येति लभ्यते इति भावः । मन्दं प्रति तूक्तवचनमेवावश्यकमिति बोध्यम् ॥ भाष्ये

उरः कण्ठः शिर इति । (भा)

शिरः पदं तालवादीनामुपलक्षणम् ॥

---

१ प्रक्रम्यन्तेऽस्मिन् वर्णा इति प्रक्रमः स्थानमुच्यते ॥

२ नोदात्तोपदेशस्य मान्तस्यानाचमेः । ७ । ३ । ३४ । अत्यल्पमिदमुच्यतेऽनाचमेरिति । अवमिकमिचमीनामिति वक्तव्यम् । वामः कामः आचामः ॥

३ एकस्मिंस्तालवादिके स्थाने ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागेनोच्चार्यमाण उदात्तः । अधरभागनिष्पन्नोऽनुदात्तः ॥

४ एवं चोच्चैरित्यनेनोर्ध्वभागो गृह्यते नीचैरित्यधरभागः । अभ्याससमधिगम्यश्चायं स्वरविशेषः यङ्लुगादिवद्विज्ञेयः ॥

[1]समाहारः स्वरितः। १। २। ३१॥

समाहारशब्दे कर्मसाधने कस्येति षष्ठ्यन्तेन पृच्छानुपपन्नेत्यत आह

---

१ समाहारः स्वरित इत्युच्यते। कस्य समाहारः स्वरितसंज्ञो भवति। अचोरित्याह। समाहारोऽचोऽन्नाभावात्। वा। समाहारोऽचोऽन्नेत्तन्न। किं कारणम्। अभावात्। न ह्यचोः समाहारोऽस्ति। नन्वयमस्ति गाङ्कुऽनूप इति। नैषोऽचोः समाहारः। अन्योऽयमुदात्तानुदात्तयोः स्थान एक आदिश्यते। एवं तर्हि गुणयोः। गुणयोश्चेन्नाच् प्रकरणात्। वा। गुणयोः समाहार इति चेत्तन्न। किं कारणम्। अच् प्रकरणात्। अजिति वर्त्तते। सिद्धं त्वच्समुदायस्याभावात् तद्गुणे सम्प्रत्ययः। वा। सिद्धमेतत्। कथम्। अच्समुदायो नास्तीति कृत्वा तद्गुणस्याचः समाहारगुणस्य सम्प्रत्ययो भविष्यति। कथं पुनः समाहार इत्यनेनाच्गुणः प्रतिनिर्देष्टुम्। मतुब्लोपोऽत्र द्रष्टव्यः। तद्यथा। पुष्पका एषां ते पुष्पकाः। कालका एषां ते कालका इति। एवं समाहारवान् समाहारः। अथवाकारो मत्वर्थीयः। तद्यथा। तुन्दः घाट इति। यद्येवं चैस्वर्यं न प्रकल्पते। तत्र को दोषः। चैस्वर्य्येणाधीमहे इत्येतन्नोपपद्यते नैतद्गुणापेक्षम्। किं तर्हि। अजपेक्षम्। चैस्वर्य्येणाधीमहे त्रिप्रकारैरज्भिरधीमहे कैश्चिदुदात्तगुणैः कैश्चिदनुदात्तगुणैः कैश्चिदुभयगुणैः। तद्यथा। शुक्लगुणः शुक्लः। कृष्णगुणः कृष्णः। यः इदानीमुभयगुणः स ह्रस्वीयामाख्यां लभते कल्माष इति वा सारङ्ग इति वा। एवमिहाप्युदात्तगुण उदात्तः। अनुदात्तगुणोऽनुदात्तः। य इदानीमुभयवान् स ह्रस्वीयामाख्यां लभते स्वरित इति॥

[1]भावेति। (कै)

जातौ च "कस्ये"त्येकवचनम्॥

[2]उपश्लेषः। (कै)

अव्यवहितोत्तरत्वरूपः॥

[3]अन्यत्र। (कै)

फलादौ॥

औत्तराधर्य्यम्। (कै)

आधाराधेयभावः। न च वर्णानां सः अमूर्त्तत्वादस्थिरत्वाच्चेति भावः। स्वरितभाज एकादेशस्यैकत्वात् कथमत्र द्वयोरचोः समाहारोऽत आह

स्थानिनोरिति। (कै)

"काय्यं क"शब्दयोर्णदन्तयोरस्तित्वात् स्वरितत्वम्। "कन्या" इत्यत्र कन्या राजन्यमनुष्याणामन्त इति तत्। एवं गौणोऽपि सर्व्वत्र नास्तीत्यर्थः॥

गौण इति। (कै)

स्थानिनोनुपश्लेषस्याग्रास्त्रीयत्वेन स्थानिवत्सूत्रात् प्रवृत्तेः। लोकन्यायसिद्धस्तु गौण इत्यर्थः॥ नन्वचोः समाहाराभावे कथं तद् गुणयोः समाहारोऽत आह

---

१ समाहरणं समाहार इति भावसाधनं मत्वा "कस्येति" प्रश्नो भाष्ये॥

२ तयोः समाहार उपश्लेषरूपः॥

३ अन्यत्र त्वौत्तराधर्य्यरूपोऽपि संभवति॥

गुणयोरिति । (कै)

एकाज्निष्ठयोरेव तयोः समाहार इत्यर्थः ॥

नैरन्तर्य्येणेति । (कै)

[1]"तस्यादित उदात्तम्" इत्युक्तेः ॥ पूर्वं प्रत्याख्यानेनाच्प्रकरणादिति विरुद्धमत आह

[2]प्रस्ताव इति । (कै)

सामर्थ्यादवगतिरित्यर्थः । तदुपपादयति

तदयमिति ॥ (कै)

अजितिवर्त्तते इति । (भा)

भाष्येऽच्शब्देन तद्विशेषबोधकावुदात्तानुदात्तशब्दौ लक्ष्येते इत्यर्थः ॥ भाष्ये तत्तद्गुणस्येणस्य व्याख्या

समाहारगुणस्येति । (भा)

उदात्तानुदात्तसमाहाररूपगुणवत इत्यर्थः ॥ अचः संज्ञित्वेन अनुपादानादयं प्रश्नोऽयुक्तोऽत आह

[3]स्वरित इति ॥ (कै)

---

१ अ १। पा २। सू ३२ ॥

२ प्रकरणं प्रस्तावो न तु स्वरितत्वादनुवृत्तिः । तस्याः पूर्वं प्रत्याख्यानात् तदयमर्थः । पूर्वसूत्रयोः सामर्थ्यात्त्रिभोऽजेव संज्ञौ उदात्तानुदात्तशब्दयोरिति तावित्यनुवृत्तावचं प्रत्याययतो न तु गुणम् ॥

३ स्वरित इत्यनया संज्ञया योग्यत्वादच्संज्ञित्वेनाक्षिप्तः ॥

न चाच् समाहार इति । (कै)

भावसाधनत्वात् समाहारशब्दस्येति भावः ॥

[1]अर्श आदेरिति । (कै)

अधिकरणे घञिति तु नोक्तं ल्युटाबाधात् । बाह्वलकस्या-गतिकगतित्वात् ॥

उदात्तेत्यादि । (कै)

स्वरशब्दस्य गुणपरत्वाभिप्रायं चोद्यमित्यर्थः ॥

वैस्वर्य्यमिति । (भा)

भावे ष्यञिति भावः । ननु स्वरशब्दस्य गुणे प्रसिद्धे कथं वैस्वर्यमित्यस्याजपेक्षत्वमत आह

[2]स्वरशब्देनेति ॥ (कै)

एवमपि ष्यञनुपपत्तिरत आह

चय एवेति । (कै)

[3]चातुर्वर्ण्यादित्वादिति भावः ॥

---

१ अर्श आदेः आकृतिगणत्वात् ॥

२ स्वरशब्देनाच उच्यन्ते । चय एव स्वरास्तेषस्वर्य्यमिति स्वार्थे ष्यञ् ॥

३ ब्राह्मणादिषु चातुर्वर्ण्यादीनामुपसंख्यानम् । वा (५ । १ । १२४) । ब्राह्मणादिषु चातुर्वर्ण्यादीनामुपसंख्यानं कर्त्तव्यम् ॥ चातुर्वर्ण्यम् । चातुर्वैद्यम् । चातुराश्रमम् ॥

व्युत्पत्त्यर्थमिति। (कै)

अनुलोमादिवदिति भावः॥ एवमपि दीर्घादौ अर्द्धमात्रकालावयवविभागाभावाद्दोष एवेत्यत आह

तच्च यथेति। (कै)

उभयोरपि समागतिरिति भावः॥ ननु गुणयोः प्रमाणदेशविशेषप्रतिपादनरूपाव्याख्यानार्थत्वात् प्रश्नोऽनुपपन्नोऽत आह

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (८। २। ४) नोदात्तस्वरितोदयम् (८। ४। ६७) इति॥ संज्ञाकरणं हि नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्। लघीयश्च चिरुदात्तप्रदेशेषु स्वरितग्रहणं न पुनः संज्ञाकरणम्। चिरुदात्तप्रदेशेषु स्वरितग्रहणे नवाच्चराणि संज्ञाकरणे पुनरेकादश। एवं तर्ह्युभयमनेन क्रियतेऽन्वाख्यानं च संज्ञा च। कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह। कथम्। अन्वर्थग्रहणं विज्ञास्यते तस्य स्वरितस्यादितोऽर्धह्रस्वमुदात्तसंज्ञं भवतीति। ऊर्ध्वमात्तमिति चात उदात्तम्॥ यदि तर्हि संज्ञाकरणमुदात्तादेर्यदुच्यते तत्स्वरितादेरपि प्राप्नोति। अन्वाख्यानमेव तर्हीदं मन्दबुद्धेः॥

महतोऽर्थस्य व्याप्तिर्भवति सुखेन विभागस्यापि परिज्ञानात्। उदात्तादेरिति (भा)। उदात्तादेः प्रतिपादकं यच्छास्त्रम् आद्युदात्तश्चेति तत्स्वरितादेरपि प्रतिपादकं प्राप्नोति ततश्च प्रत्ययः कदाचित् स्वरितादिरपि स्यादित्यर्थः। अन्वाख्यानमेवेति (भा)। न केवलमिदं सूत्रम्। यावद् "उच्चैरुदात्तः" (१। २। २९) इत्यादिसंज्ञाकरणमपि मन्दबुद्धिप्रतिपादनार्थम्। सिद्धो हि वेदाध्यायिनां शिक्षायामेवोदात्तादित्यवहारः। स्वरितस्येति (भा)। वा अर्धह्रस्वोदात्तादित्याकारप्रश्लेषः। इयं नव सूत्री "उदात्तादनुदात्तस्य स्वरितः" (८। ४। ६६) इत्येतस्मात् परा कर्त्तव्या।

नैवं भूतमिति ॥ (कै)

सन्ध्यक्षरादीति । (कै)

अवर्णभागः पूर्वदकारादिभाग उत्तर इत्येवं रूपस्येत्यर्थः ॥

तत्त्वत इति । (कै)

अन्यथाऽन्वाख्यानाऽसङ्गतिरिति भावः ॥ भाष्ये

स्थानित्यादिः । (कै)

स्थानानि कण्ठादीन्यष्टौ ॥ "करणम्" आभ्यन्तरप्रयत्नः ॥

उत्तरयति

स्वरितस्यार्धर्चस्योदात्तादुदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात् कार्यं स्वरितादिति सिद्ध्यर्थम् ॥ वा ॥

स्वरितस्यार्धर्चस्योदात्तादा उदात्तस्वरितपरस्य सन्नतरः (१ । २ । ४) इत्येतस्मात् सूत्रादिदं सूत्रकाण्डमुदात्तादनुदात्तस्य स्वरितः (८ । ४ । ६६) इत्यतः कर्त्तव्यम् । किं प्रयोजनम् । स्वरितादिति सिद्ध्यर्थम् । स्वरितादिति सिद्ध्यर्थं स्यात् । स्वरितात् संहितायामनुदात्तानाम् (१ । २ । ३९) इति । "इमं मे गङ्गे यमुने सुतुद्रि" । क्व तर्हि स्यात् । यः सिद्धिः स्वरितः । कार्यं (६ । १ । ८५) देवदत्तयज्ञदत्तौ ॥ स्वरितोदात्तार्थं च । वा । स्वरितोदात्तार्थं च तत्रैव

तेन "स्वरितात् संहितायामनुदात्तानाम्" (१ । २ । ३९) इत्येकश्रुतौ विधीयमानायाम् "उदात्ताद्" इति स्वरितस्य सिद्धत्वं भवति । तेन मध्यात् स्वरितात् परेषां गङ्गे प्रभृतीनाम् आमन्त्रितत्वादनुदात्तानामेकश्रुतिर्भवति । क्व तर्हीति (भा) । आश्रयात् सिद्धत्वं स्वरितस्य भविष्यतीत्यभिप्रायः । कार्यमिति (भा) । अत्र "तित्स्वरितम्" (६ । १ । ८५) इति स्वरितत्वं तत्र सिद्धमित्यत्रैव स्यात् । स्वरितोदात्तार्थमिति (भा) । स्वरितस्य य उदात्तो विधीयते स आद्यमिकस्यासिद्धत्वान्न प्राप्नोति ।

व्याकरणं नामेति ॥ (भा)

छन्दः शास्त्रेषु। (भा)

प्रातिशाख्यशिक्षादिषु ॥

अभिविनीतः। (भा)

शिक्षितः ॥

उपलब्ध्या। (भा)

व्युत्पत्त्या ॥ **एवं तर्हि इदमपि व्यर्थमित्याह**

कर्त्तव्यम्। "न सुब्रह्मण्यायां स्वरितस्य तूदात्तः" (१। २। ३७) इन्द्र आगच्छ। क्व तर्हि स्यात्। यः सिद्धः स्वरितः। सुब्रह्मण्योमिन्द्र आगच्छ ॥ स्वरितोदात्ताच्चास्वरितार्थम्। वा। स्वरितोदात्ताच्चास्वरितार्थम्। तच्चैव कर्त्तव्यम्। इन्द्र आगच्छ हरिव आगच्छ ॥ स्वरितपरसन्नतरार्थं च। वा। स्वरितपरसन्नतरार्थं च तच्चैव कर्त्तव्यम्। उदात्तस्वरितपरस्य सन्नतरः (१। २। ४०)। माणवकजटिलकाध्यापक ण्यङ् (६। २। ५१ ॥ ८। २। ४)। क्व तर्हि स्यात्। यः सिद्धः स्वरितः। माणवक जटिलकाभिरूपक क्व (५।

सुब्रह्मण्योमिति (भा)। सुब्रह्मणि साधुरिति यत्प्रत्ययः तित्त्वात् स्वरितः। ततश्चावेकादेशः स्वरितानुदात्तयोरान्तरतम्यात् स्वरितः। ततः "ओमाङोश्च" (६। १। ९५) इत्युदात्तस्वरितयोरेकादेशः स्वरित एव तस्य सिद्धत्वादुदात्तत्वम्। "सुब्रह्मण्यायाम्" (१। २। ३७) इति च स्वरूपमेव गृह्यते न तु निगदो लक्ष्यते। स्वरितोदात्ताच्च इति (भा)। "आगच्छ" इत्यत्र गशब्दाकारस्य स्वरितस्योदात्तत्वे कृते "उदात्तादनुदात्तस्य स्वरितः" (८। ४। ६६) इति छशब्दाकारस्य स्वरितत्वं प्राप्नोति। ण्यङिति

यद्येवमिति ॥ (भा)

ननु प्रदेशेषु स्वरितग्रहणाकरणे उदात्तग्रहणेनावयवस्य बोधनेऽपि तत्स्थाने यणोऽभावात् "उदात्तस्वरितयोर्यण" (८। २। ४) इत्यत्रानुपपत्तिरेवेत्यत आह

आक्षिप्यत इति। (कै)

तत्र सूत्रे एतदुपस्थितिसामर्थ्यादिति भावः ॥

सत्यपीति। (कै)

३। १२॥ ६। १। १८५)। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। देवब्रह्मणोरनुदात्तवचनं ज्ञापकं स्वरितादिति सिद्धत्वस्य। वा। देवब्रह्मणोरनुदात्तवचनं (देवब्रह्मणोरनुदात्तः। १। २। ३८। देवब्रह्मणोरनुदात्तत्वमेके। वा। देवब्रह्मणोरनुदात्तत्वमेक इच्छन्ति। देवा ब्रह्माणः। देवा ब्रह्माणः॥) ज्ञापकं सिद्ध इह स्वरित इति। यद्येतज्ज्ञाप्यते स्वरितोदात्तात् परस्यानुदात्तस्य स्वरितत्वं प्राप्नोति। न ब्रूमो देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्ध इह स्वरित इति। किं तर्हि परमेतत् कारुडमिति ॥

(भा)। "न्यधी च" (६। १। ५१) इति पूर्वपदप्रकृतिस्वरस्यत "उदात्तस्वरितयोर्यणः" (८। २। ४) इत्यकारः स्वरितस्यासिद्धत्वात् पूर्वस्य सन्नतरो न स्यात्। देवब्रह्मणोरिति (भा)। लिङ्गात् पाठक्रमबाधने क्रमान्तरमाश्रीयतेऽन्यथा स्वरितस्यासिद्धत्वादनुदात्तस्यानुदात्तविधानमनर्थकं स्यात्। यद्येतदिति (भा)। स्वरितस्यैव सिद्धत्वमनेन लिङ्गेन ज्ञाप्यत इत्यर्थः। न ब्रूम इति (भा)। सन्निवेशान्तरज्ञापनार्थं लिङ्गं व्याख्यायत इत्यर्थः ॥

प्रयोजनविशेषलाभात् गौरवं न दोषायेति भावः ॥ भाष्ये

ऊर्द्ध्वमाचमिति । (भा)

तालवादिषूर्द्ध्वदेशे उच्चारणेन गृहीतमित्यर्थः ॥ उदात्तादेरुच्यमानं कार्य्यमिह शास्त्रे न किञ्चिदत आह

[1]उदात्त इत्यादेरिति । (कै)

इदमुपलक्षणम् अन्तोदात्तस्यापि ॥ एवं भूतः अन्वाख्यानं न दृश्यते इति यदुक्तं तत्परिहरति

न केवलमिति । (कै)

"उच्चैरुदात्त" इत्यादिकमपि तादृशमिति भावः ॥ भाष्ये "इदम्" इत्य"स्योच्चैरुदात्त" इत्यादिकमित्यर्थो बोध्यः ॥

आकरप्रश्लेष इति । (कै)

तदभावे अर्द्धर्चस्योदात्तादिति पञ्चम्यनन्विता स्यादिति भावः ॥ आङ्द्वयमारम्भाभिविध्योरिति तत्स्खलितमाह

इयं नवेति ॥ (कै)

तेन मे शब्दादिति । (कै)

फिट् स्वरेणेदमोऽन्तोदात्तत्वाद् इदम् इत्येकादेशस्वरेणान्तोदात्तम् । ततो मे शब्दस्य [2]"अनुदात्तं सर्वमपादादौ" इत्यनुदा-

---

१ "उदात्तादेः" इति पाठ उपलब्धकैरटपुस्तकेऽस्ति ॥

२ अ ८ । पा १ । सू १८ ॥

त्वे [1]"इमामि"त्युदात्तात्परत्वेन "[2]उदात्तादनुदात्तस्य" इति स्वरितत्वं ततो "गङ्गे" प्रभृतीनाम् [3]"आमन्त्रितस्य" इत्याद्युदात्तत्वेन निहतानामेकश्रुतिः ॥

अच तिदिति । (कै)

तदेकादेशोऽपि आन्तरतम्यात् स्वरितः । करोतेर्ण्वतिकार्य्यम् । तदुत्तरं देवदत्तयज्ञदत्तौ इति [4]"आमन्त्रितस्य च" इति निहतम् ॥ भाष्ये

इन्द्र आगच्छेति । (भा)

आङुदात्तः । गच्छेति निहतम् । तत [5]"उदात्तादनुदात्तस्य"

---

१ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया । ८ । ३ । ६ । १० । ६ । ७५ । ५ ॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि परुष्णि स्तोममासेवध्वमसिक्न्या च सहमरुद्वृधे वितस्तया चार्जीकीय आशृण्वन्तु हि सुषोमया चेति समस्तार्थः । अथैकपदनिरुक्तम् । गङ्गा गमनाद् यमुना प्रयुवती गच्छतीति वा । सरस्वती सर इत्युदकनाम सर्त्तेस्तद्वती । शुतुद्री शुद्राविणी क्षिप्रद्राविणी आ शु तुन्नेव द्रवतीति वेरावतीं परुष्णीत्याऊः पर्ववती कुटिलगामिनी असिक्न्यसुक्ष्णासिता सितमिति वर्णनाम तत्प्रतिषेधोऽसितं मरुद्वृधाः सर्वा नद्यो मरुत एना वर्द्धयन्ति वितस्ता विदग्धा विपट्टा महाकूलार्जीयां विपाडित्याऊः ऋजीकप्रभवा वर्ज्जुगामिनो वा विपाड् विपाटनाद्वा विपाशनाद्वा विप्रापनाद्वा पाशा अस्यां व्यपाशन्तवसिष्ठस्य सुमूर्षतस्तस्माद् विपाडुच्यते ॥

२-५ अ ८। पा ४। सू ६६ ॥ ३-४ अ ६। पा १। सू १९८ ॥

(तस्यादित उदात्तमर्द्धर्चस्वम्। १। २। ३२।) (अ. १। पा. २। आ. १)

इति गकाराकारः स्वरितः तस्यानेनोदात्तः। इन्द्रेति "आमन्त्रितम्" आद्युदात्तं द्वितीयोवर्ण "उदात्ताद्" इति स्वरितः तस्याप्यनेनोदात्तः ॥

स्वरित एवेति। (कै)

[1]"एकादेश उदात्तेन" इत्यत्र "अनुदात्तस्य" इत्यनुवृत्तेः स नेति भावः। न च इको गुणेति सूत्रे [2]"एङिपररूपम्" इत्यत्ररूपग्रहणस्य परस्य यादृशं रूपं तादृश एव यथास्यादिति फलमुक्तमिति अत्र ओम उदात्तत्वादुदात्त एकादेशो युक्त इति वाच्यम्। [3]"तज्ज्वत्क्रोष्टुः" इति सूत्रभाष्यप्रामाण्येन स्वरस्य रूपत्वाभावात् ॥ ननु [4]"सुब्रह्मण्यायाम्" इति निगदाभिधानादयमेव विषयो न युक्त इत्यत आह

सुब्रह्मण्यायामिति। (कै)

स्वरितस्य तूदात्त इति वाक्ये सुब्रह्मण्याशब्दस्वरूपमेव गृह्येतेत्यर्थः ॥

उदात्तत्वे कृते इति। (कै)

[5]"न सुब्रह्मण्यायाम्" इत्यनेन। उत्कर्षे तस्यासिद्धत्वात् ह्रस्वश्चब्दाकारोऽनुदात्त एवेत्यर्थः ॥

---

१ अ ८। पा २। सू ५॥ २ अ ६। पा १। सू ९४॥
३ अ ७। पा १। सू ९५॥ ४ अ १। पा २। सू ३७॥
५ अ १। पा २। सू ३७॥

न्यधी चेति । (कै)

अञ्चतौ वप्रत्ययान्त उत्तरपदे नि अधि इत्येतत् पूर्वपदं प्रकृतिस्वरमिति सूत्रार्थः ॥ [१]"न्यङ्स्वरौ स्वरितौ" इति फिट् सूत्रमेतदर्थस्यैवानुवादकमिति भावः ॥ "क" इत्यत् प्रत्ययान्तत्वात् स्वरितम् ॥

देवब्रह्मणोरिति । (भा)

अनयोः "सुब्रह्मण्या" निगदान्तर्गतयोः स्वरितस्योदात्तत्वे प्राप्तेऽनेनाऽनुदात्तत्वं क्रियते । देवा ब्रह्माण इति चामन्त्रिताद्युदात्तः । शेषनिघाते "उदात्तादनुदात्तस्य" इति स्वरितः । स्वरितस्यैव सिद्धत्वमात्रज्ञापने तु अस्य प्रकरणस्यासिद्धत्वे मानाभावात् । "[२]न सुब्रह्मण्ये"ति विहित स्वरितोदात्तगकारात् परत्वेन इन्द्र आगच्छ इत्यादौ छकाराकारस्याष्टमिकः स्वरितः स्यादिति उत्कर्ष एव ज्ञाप्यत इति बोध्यम् ॥ असिद्धकाण्डे पठनमेव [३]"संनिवेशान्तरम्" ॥ न च देव ब्राह्मणोरित्यचाऽऽश्रयाऽसिद्धत्वमिति वाच्यम् । दृष्टानुरोधेनैतत्प्रकरणोत्कर्षद्वारैव तत् सिद्धत्वज्ञापनादिति दिक् ॥

---

१ फिट् सू-७४ ॥
२ अ १ । पा २ । सू ३७ ॥
३ कै ॥

[1]एकश्रुति दूरात्सम्बुद्धौ । १ । २ । ३३ ॥

[2]एकवचनं सम्बुद्धिः (पा)

इत्युक्तेर्विचारानुपपत्तिरत आह

---

१ किमिदं पारिभाषिक्याः संबुद्धेर्ग्रहणम् "एकवचनं सम्बुद्धिः" (२ । ३ । २९) आहोस्विदन्वर्थग्रहणं संबोधनं सम्बुद्धिरिति । किं चातः । यदि पारिभाषिक्या देवा ब्रह्माणः । अत्र न प्राप्नोति । अथान्वर्थग्रहणं न दोषः । यथा न दोषस्तथास्तु । किं पुनरियमेकश्रुतिरुदात्ताहोस्विदनुदात्ता । नोदात्ता । कथं ज्ञायते । यदयम् "उच्चैस्तरां वा वषट्कारः (१ । २ । ३५) इत्याह । कथं कृत्वा ज्ञापकम् । अतन्त्रं तरनिर्देशः । यावदुच्चैस्तावदुच्चैस्तरामिति ॥ यदि तर्हि नोदात्तानुदात्ता । अनुदात्ता च न । कथं ज्ञायते । यदयम् "उदात्तस्वरितपरस्य सन्नतरः" (१ । २ । ४०) इत्याह । कथं कृत्वा ज्ञापकम् । अतन्त्रं तरनिर्देशः । यावत् सन्नस्तावत् सन्नतरः इति । सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यमेकश्रुतिरन्तकालं क्रियते ॥ अपर आह । किमियमेकश्रुतिरुदात्तोतानुदात्ता । उदात्ता । कथं ज्ञायते । यदयम् "उच्चैस्तरां वा वषटकार" इत्याह । कथं कृत्वा ज्ञापकम् । तन्त्रं तरनिर्देशः । उच्चैर्दृष्ट्वोच्चैस्तरामित्येतद्भवति । यदि तर्हि उदात्तानुदात्ता । अनुदात्ता च । कथं ज्ञायते । यदयम् "उदात्तस्वरितपरस्य सन्नतर" इत्याह । कथं कृत्वा ज्ञापकम् । तन्त्रं तरनिर्देशः । सन्नं दृष्ट्वा सन्नतर इत्येतद्भवति । त एते तन्त्रे तरनिर्देशे सन्नस्वरा भवन्ति । उदात्तः । उदात्ततरः ॥ अनुदात्तः । अनुदात्ततरः ॥ स्वरितः । स्वरिते य उदात्तः सोऽन्येन विशिष्टः । एकश्रुतिः सप्तमः ॥

२ अ २ । पा ३ । सू २९ ॥

क्तचिमेति ॥ (कै)

अक्तचिमग्रहणं समर्थाङ्गवतीत्यतः सामर्थ्यं दर्शयति

न हीति ॥ (भा)

ननु क्तचिमग्रहणेऽपि महासंज्ञावलात् दूरात् सम्बोधनार्थकैक-वचनान्तस्येत्यर्थलाभोऽत आह

व्याप्तिश्चेति ॥ (कै)

अस्याः स्वरान्तरत्वप्रसिद्धेः प्रश्नानुपपत्तिरत आह

उदात्तेति ॥ (कै)

उच्चैस्तरामिति । (कै)

तेनोदात्तमात्रस्य विधानात् पक्षे एकश्रुतिश्च विधानादिति भावः ॥ भाष्ये

सैषा ज्ञापकाभ्यामिति । (भा)

ज्ञापकाभ्यां कर्त्तृभ्याम् एकश्रुतिरुदात्तानुदात्तयोर्मध्यस्थानं प्राप्यत इत्यर्थः ॥

मध्यम् (भा)

इत्यस्य "अन्तरालम्" इति व्याख्या ॥

हरतेरिति । (कै)

व्यापारद्वयार्थत्वात्

"प्रधानकर्मण्याख्येये लादीनाञ्चर्द्विकर्मणाम्" ।

इति वचनाच्च ॥ स्वरितादिशेषं दर्शयितुमाह

क्षीरेति ॥ (कै)

सति चेति । (कै)

वौषट् व्यतिरिक्तमन्त्रभागस्योदात्तत्वे सत्येव तदपेक्षप्रकर्षप्रत्ययोपपत्तिरिति भावः ॥ एकश्रुतिगतोदात्तापेक्षया प्रकर्षानुपपत्तिमाशंक्यदृष्टान्तेन साधयति

यथेति । (कै)

अत्रापि पक्षे भेदतिरोधानमेव स्वरितादिशेषः । तेनैवोभयरूपतेति बोध्यम् ॥ एवं च "सन्नतर" एकश्रुतिविषये एवेति बोध्यम् ॥ सप्तस्वरमध्ये उदात्ततरानुदात्ततरौ एकश्रुतिगतोदात्ताद्यपेक्षयैवातिशयविशिष्टौ न तु स्वतन्त्रोदात्तापेक्षया

अनुदात्तेनेति । (कै)

उदात्तस्वरितपरत्वे इत्यर्थः ॥

कस्य चिदिति । (कै)

तदपरस्येत्यर्थः ॥

श्रुतस्त्विति । (कै)

तस्य वैकल्पिकत्वाद्यदा स जायते तदेत्यर्थः ॥

[1]न सुब्रह्मण्यायां स्वरितस्य तूदात्तः । १।२।३७॥



नचात्रोदात्तोऽन्यथासिद्ध इत्याह

ओमिति । (कै)

अभ्यादानपदेनायज्ञकर्मोच्यत इति भावः । अत एव जपेपि तं श्रुतमेव जपन्ति । अभ्यादानं प्रारम्भ इति तु वृत्तिः । तद्रीत्या त्वत्र प्राप्तिरेवनेति बोध्यम् ॥ "स्वरितस्य तूदात्त" इत्यंशस्योदाहरणान्तरं प्रसङ्गादाह

---

१ सुब्रह्मण्यायामोकार उदात्तः । वा । सुब्रह्मण्यायामोकार उदात्तो भवति । सुब्रह्मण्योम् ॥ आकार आख्याते परादिश्च । वा । आकार आख्याते परादिश्चोदात्तो भवति । इन्द्र आगच्छ । हरि आगच्छ ॥ वाक्यादौ च द्वे द्वे । वा । वाक्यादौ च द्वे द्वे उदात्ते भवतः । इन्द्र आगच्छ । हरिव आगच्छ ॥ मघवन् वर्जम् । वा । आगच्छ मघवन् । सुत्यापराणामन्तः । वा । सुत्यापराणामन्त उदात्तो भवति । ह्यहे सुत्याम् । व्यहे सुत्याम् ॥ असावित्यन्तः । वा । असावित्यन्त उदात्तो भवति । गार्ग्योयजते । वात्स्यो यजते ॥ अमुष्येत्यन्तः । वा । अमुष्येत्यन्त उदात्तो भवति । दाक्षेः पिता यजते ॥ स्यान्तस्योपोत्तमं च । वा । स्यान्तस्योपोत्तममुदात्तं भवत्यन्तश्च । गार्ग्यस्य पिता यजते । वात्स्यस्य पिता यजते ॥ वा नामधेयस्य । वा । वा नामधेयस्य स्यान्तस्योपोत्तममुदात्तं भवति । देवदत्तस्य पिता यजते । देवदत्तस्य पिता यजते ॥

(न सुब्रह्मण्यायां स्वरितस्य तूदात्तः । १ । २ । ३७ ।) (अ. १ । पा. २ । आ. १)

इन्द्र आगच्छेति ॥ (भा)

इन्द्रशब्द इति । (कै)

हरिवच्छब्दस्योपलक्षणम् ॥

हरिव इति । (भा)

[1]"मतुवसोः" इति रुः ॥

अनन्तरेति । (कै)

इन्द्र आगच्छेतीन्द्रशब्द इत्याद्यनुपदोक्तयेति भावः ॥ एतन्निमित्तःशेषनिघातस्तु न । असा असिद्धत्वात् ॥ भाष्ये

द्वे द्वे इति । (भा)

वर्णरूपेत्यर्थः । "श्वः सुत्याम् आगच्छ मघवन्नि"ति वाक्यं तत्र श्वःशब्दोनिपातत्वादुदात्तः । सुत्याशब्दः "[2]संज्ञायां समजे"ति क्यबन्तोऽन्तोदात्तः । तत्रोदात्त इत्यनुवर्त्तते ॥

निघातविधानादिति । (कै)

पूर्वकारस्याप्यनुदात्तत्वेन स्वरिताऽप्राप्त्या "[3]स्वरितस्य तूदात्त" इत्यस्याप्राप्तेरिति भावः । तत "[4]एकश्रुति दूराद्" इत्येकश्रुतिः तत्रेति तत्त्वम् ॥

सुत्याशब्द इति । (कै)

---

१ मतुवसो रु सम्बुद्धौ छन्दसि । ८ । २ । १ ॥

२ अ ३ । पा ३ । सू ९९ ॥ ३ अ १ । पा २ । सू ३७ ॥

४ अ १ । पा २ । सू ३३ ॥

सर्वनामकार्य्याभावाद्वृद्धत्वाभावनिश्चयः स्वः शब्दस्थाने द्युहे इत्याद्यूहः ॥

इदमिति । (कै)

अग्निमाण्ण्येवम् ॥

स्यान्तस्य (भा)

इत्यनेन उपोत्तमान्योदात्तयोः समुच्चयः ॥

---

[1]देवब्रह्मणोरनुदात्तः । १। २। ३८ ॥

भाष्योक्तम् "एके" इति व्याचष्टे

[2]ये इति । (कै)

---

१ देवब्रह्मणोरनुदात्तत्वमेके । वा । देवब्रह्मणोरनुदात्तत्वमेक इच्छन्ति । देवा ब्रह्माणः । देवा ब्रह्माणः ॥

२ ये देवा ब्रह्माण इति पदयोर्वैयधिकरण्यमाऊस्तदा हि पूर्वस्यामन्त्रितस्याविद्यमानत्वाद् द्वयोरपि पदयोरामन्त्रितादयुदात्तत्वे शेषनिघाते च स्वरितत्वे च कृतेऽनेनानुदात्तः क्रियते यदा तु देवाः ब्रह्माण इत्यनयोः सामानाधिकरण्यं तदा विभाषितं विशेषवचने बऊवचनम् (सामान्यवचनं विभाषितं विशेषवचने । ८ । १ । ७४ । इह कस्मान्नभवति ब्राह्मण वैयाकरण । बऊवचनमिति वक्ष्यामि ॥) इति पक्षे विद्यमानत्वाद् "आमन्त्रितस्य" (८ । १ । १९) इति निघातस्य सिद्धत्वान्नानेनार्थ इत्यन्येषां मतमिति मतभेदप्रदर्शनार्थम् "एक" इत्युक्तम् ॥

ये आस्ते इत्यर्थः "एके" इत्युक्तिर्नविभाषाग्रहणानुवृत्तिरुक्ता किन्तु ब्रह्मनंशे सूचारम्भावैयात्यबोधिकेति भावः ॥

तदा हि । (कै)

वैयधिकरणे हि ॥

अविद्यमानत्वादिति । (कै)

[1]"आमन्त्रितं पूर्वम्" इत्यनेन ध्वनितम् ॥ मतान्तरं दर्शयितुमाह

यदात्विति ॥ (कै)

नानेनार्थ इति । (कै)

"ब्रह्मण" इत्यत्र अनुदात्तार्थनेत्यर्थः । देवार्थं तु कार्य्यमेव । भाष्येत्वेवं योजना देवब्रह्मणोर्मध्ये ब्रह्मन् शब्दस्यानेनानुदात्तत्वमेके वैयधिकरणवादिन इच्छन्ति । सामानाधिकरणपक्षे "हे" इत्येक एवोदात्तः । वैयधिकरणवादिनान्तु "हे" "ब्र" इति च द्वयमुदात्तम् इदमेव ध्वनयितुं द्विः पाठ उदाहरणेति बोध्यम् ॥ केचित्तु वेदार्थस्याव्यवस्थितत्वे मानाभावाद् इदं चिन्त्यम् ॥ किं च पक्षे विद्यमानस्यापि सत्त्वेन ब्रेत्यस्योदात्तस्याग्रिमस्यानुदात्तस्य च श्रवणाय सूत्रमावश्यकमेव भाष्यं तु विभाषानुवृत्तिफलकमेव । तथाच पक्षे आमन्त्रितस्वरेणाद्युदात्तस्य देवशब्दस्य ब्रह्मशब्दस्य चान्तोऽनेनानुदात्तस्वरितस्य तु उदात्तः इत्यस्यायमपवादः । "सु त्यु" तचानुदात्त एव । पक्षान्तरे तु पूर्वसूत्रणान्तेऽप्युदात्ते "[2]एकश्रुति-

---

१ आमन्त्रितं पूर्वमविद्यमानवत् । ८ । १ । ७२ ॥

२ अ १ । पा २ । सू ३३ ॥

दूरात्" इत्येकश्रुतिः अत एवैकश्रुतीति सूत्रे संबुद्धिपदार्थनिरूपणावसरे देवा ब्रह्माण इत्यत्रैकश्रुतिरुक्ता भाष्ये ॥ इदं च सूत्रं वृत्तावेवं व्याख्यातम्। "[1]सुब्रह्मण्यायां" देवा ब्रह्माण इति पठ्यते। तत्र पूर्वेण स्वरितस्योदात्ते प्राप्तेऽनेन तस्यानुदात्तो विधीयते इति। एकश्रुतिसूत्रोदाहृतं देवा ब्रह्माण इति सुब्रह्मण्यानिगदस्यातिरिक्तमेवेत्यत्र न मानमित्याहुः ॥

---

[2]स्वरितात्संहितायामनुदात्तानाम्। १। २। ३९॥

सञ्ज्ञाया इति। (कै)

"अनुदात्तानाम्" इति पदोपात्तव्यक्तिगताया इति शेषः। उपात्तस्याविवक्षा कारणाभावादिति भावः॥ संख्येयप्रधानत्वे द्वयेकेषामिति स्यादत आह

---

१ अ १। पा २। सू ३७॥

२ स्वरितात्संहितायामनुदात्तानामिति चेद्द्व्येकयोरेकश्रुत्यवचनम्। वा। स्वरितात्संहितायामनुदात्तानामिति चेद्द्व्येकयोरेकश्रुत्यं वक्तव्यम्। आम्रिवेष्यः। पचति। किं पुनः कारणं न सिध्यति। बहुवचनेन निर्देशः क्रियते तेन बहूनामेकश्रुत्यं स्याद्द्व्येकयोर्न स्यात्॥ नैष दोषः। मात्र निर्देशस्तन्त्रम्। कथं पुनस्तेनैव नामनिर्देशः क्रियते तच्चातन्त्रं

द्वित्वमिति ॥ (कै)

नन्वेवं संख्याया ऐकश्रुत्यविधानायोगात् षष्ठ्यनुपपन्नेत्यत आह तेनेति। (कै)

अनुदात्तद्वित्वादौ सति तदधिकरणभूतानां ऐकश्रुत्यं वक्तव्यमिति भाष्यार्थः ॥

स्यात्। तत्कारी च भवांस्तद्द्वेषी च। नान्तरीयकत्वादत्र बहुवचनेन निर्देशः क्रियते। अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देशः कर्त्तव्य इति। तद्यथा। कश्चिदन्नार्थी शालिकलापं स पलालं स तुषमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सकण्टकान् स शकलान् आहरति नान्तरीयकत्वात्॥ स यावदादेयं तावदादाय शकलकण्टकानुत्सृजति। एवमिहापि नान्तरीयकत्वाद् बहुवचनेन निर्देशः क्रियतेऽविशेषेणैकश्रुत्यम्॥

अविशेषेणैकश्रुत्यमिति चेद्द्व्यवहितानामप्रसिद्धिः। वा। अविशेषेणैकश्रुत्यमिति चेद्द्व्यवहितानामैकश्रुत्यं न प्राप्नोति। "इमं मे गङ्गे यमुने सरस्वति शुतुद्रि" (ऋ-सं ८ अ-१० म ७५-५)॥ अनेकमपीति तु वचनात् सिद्धम्। वा। अनेनाप्येकमपि स्वरितात् परं संहितायामेकश्रुति भवतीति वक्तव्यम्। सिध्यति। सूत्रं तर्हि भिद्यते। यथा न्यासमेवास्तु। ननु चोक्तं स्वरितात् संहितायामनुदात्तानामिति चेद्द्व्येकयोरैकश्रुत्यवचनमविशेषेण व्यवहितानामप्रसिद्धिरिति। नैष दोषः। कथम्। एकशेषनिर्देशोऽयम्। अनुदात्तस्य चानुदात्तयोश्चानुदात्तानां चानुदात्तानामिति। एवमपि षट्प्रभृतीनामेव प्राप्नोति। षट्प्रभृतिष्वेकशेषः परिसमाप्यते। प्रत्येकं वाक्यपरिसमाप्तिर्दृश्यते इति द्व्येकयोरपि भविष्यति॥

[1]तन्त्वशब्दविति । (कै)

विवक्षितलक्षणं प्राधान्यम् ॥ भाष्ये

नाचेति । (भा)

अनुवादस्थले इत्यर्थः । व्याघ्रिन्यायस्याविवक्षा हेतुरिति बोध्यम् ॥ विनार्थकान्तराशब्दात् भवार्थे छो [2]गहादित्वात् । स्वार्थे कः । नञ्समासः । नलोपाऽभावश्च [3]पृषोदरादित्वात् । नान्तरीयकशब्दे ॥ ननु बहुत्वसंख्याविवक्षापूर्वकत्वाद्बहुत्ववचनस्य नान्तरीयकत्वमयुक्तमत आह

[4]शब्देति । (कै)

शब्दकृतः संस्कारः तदुच्चारणकृतमदृष्टं तदर्थमित्यर्थः । सौत्रं बहुत्ववचनं इति तात्पर्य्यम् ॥

[5]न कार्य्येति । (कै)

शब्दानां कार्य्यमर्थोपस्थितिः सा प्रकृते नविवक्षितेत्यर्थः ॥ स शब्दानिति पाठः ॥

व्यवधानादित्यर्थः इति । (कै)

बहुत्वविवक्षायां तु सामर्थ्यात् परिभाषाबाधः इति भावः ॥

---

१ तन्त्वशब्दोऽत्र प्रधानवाची यथा गृहं संमार्ष्टीति सङ्ख्या न विवक्ष्यते अथेहापीत्यर्थः ॥

२ गहादिभ्यश्च । ४ । २ । १३८ ॥ ३ अ ६ । पा ३ । सू १०९ ॥

४ शब्दसंस्कारार्थमेवात्र बहुत्वं विवक्ष्यते न तु कार्य्यसिद्ध्यर्थमित्यर्थः ॥

५ उपलब्धकैयटपुस्तके "न तु कार्य्य" इति 'तु' शब्दघटितः पाठोऽस्ति ॥

[1]योगारम्भ इति । (कै)

एकशेषसूत्रारम्भे इत्यर्थः ॥ एकशेषेऽपि त्रिप्रभृतिष्वेव स्यात् । अत आह

वर्गत्रयेति । (कै)

तात्पर्य्यवशात् भिन्नसंख्याकलितेत्यर्थः ॥

जातेः (कै)

अनुदात्तत्वजातेः । व्यक्तिद्वारापरत्वं कार्य्यसम्बन्धस्येति बोध्यम् । तत्राव्यवहितव्यक्तिद्वारैव सर्वगतजातेः परत्वं बोध्यम् । इदं चिन्त्यम् । एकैकव्यक्तिव्यङ्ग्यत्वाज्जातेस्तद्व्यक्तिद्वारकं परत्वं तद्व्यक्तिव्यङ्ग्यायाः । किं च [2]"आर्धधातुके" इति सूत्रस्थभाष्याद्व्यक्तिद्वारकं परत्वादिजातेरयुक्तमिति निरूपितं "[3]हलन्ताच्च" इति सूत्रे तस्मादेकशेषप्रत्याख्यानेऽपि भिन्नसंख्याकलितप्रातिपदिकार्थानां तन्त्रभिन्नसंख्याकलितार्थकप्रातिपदिकानां वा "[4]जात्याख्यायाम्" इत्यस्यापि भाष्ये प्रत्याख्यातत्वेनेदमेव युक्तमिति परे ॥ ननु वर्गत्रयोपादानेनैकशेषकरणादेवमपीत्याद्यनुपपन्नमत आह

[5]सहविवक्षायामिति । (कै)

एकया क्रियया गुणेन चानेकस्य युगपत्सम्बन्धप्रतिपादनेच्छा सहविवक्षेत्यर्थः ॥ षण्णामित्येव वक्तव्ये प्रभृतिग्रहणमधिकमत आह

---

१ योगारम्भपक्षे वर्गत्रयोपादानेनैकशेषः क्रियते ॥

२ अ २ । पा ४ । सू ३५ ॥ ३ अ १ । पा २ । सू १० ॥

४ जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् । १ । २ । ५८ ॥

५ सहविवक्षायामेकशेषविधानात् समुदितानां कार्य्यप्रसङ्गः ॥

[1]प्रभृतीति ॥ (कै)

एकशेषवाक्ये । (कै)

एकशेषविग्रहवाक्ये ॥

[2]निर्देश एवेति । (कै)

बोध एवेत्यर्थः ॥

यथेति । (कै)

तत्रैव मातापित्रोः श्राद्धं कुर्य्यात् इत्यत्रैवाचापि निर्देश एव सह विवक्षा इत्यदोषः ॥

---

[3]अपृक्त एकाल्प्रत्ययः । १ । २ । ४१ ॥

अपृक्तग्रहणेऽचराधिक्यादाह

[4]पदद्वयेति । (कै)

अपृक्तमित्यखण्डमिति भावः ॥ युवापत्यसंप्रत्ययार्थत्वात् णस्य कथं सामर्थ्यमत आह

---

१ प्रभृतिग्रहणेन चैकशेषवाक्येऽनुदात्तानामित्यनेनैव चतुरादयोऽप्यनुदात्ता गृह्यन्ते ॥

२ निर्देश एव सहविवक्षा । कार्यप्रवृत्तिस्तु प्रत्येकं यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम् इत्युक्ते देवदत्तादयः पृथगेव भुञ्जते ॥

३ अपृक्तसंज्ञायां हलग्रहणं स्वादिलेपे हलोऽग्रहणार्थम् । वा ॥

४ पदद्वयोच्चारणमेव गौरवमिति भावः ॥

[1]लुगपेति ॥ (कै)

अण एव । (कै)

[2]"तस्यापत्यम्" इति सामान्यविहितस्य ॥

प्राप्तस्येति । (कै)

अणपवादत्वेनेति शेषः । तदेवं णस्य लुगभावं प्रसाध्यहल्ग्रहण दृवाल्ग्रहणेऽपि त्रीण्येव पदानीति पञ्चद्वयसाम्यमित्याह भाष्ये

[3]तानीति । (भा)

अनेन पदसाम्ये साचावैषम्यकिञ्चित्करमिति सूचितम् ॥ ननु प्रत्ययेनान्ति विशेष्यमाणे तदन्तविध्यभावात् कथमत्र प्राप्तिरत आह

प्रत्ययस्येति । (कै)

व्याश्रिन्यायेनान्तेव विशेषणमिति भावः ॥ ननु [4]"वेरपृक्तस्य" इत्यत्रानुनासिकः परो यस्तस्य वेर्लोप इति वक्ष्यते इति कथं दवौ प्राप्तिः । अत एवास्य अत इत्वं न इत्यत आह

इदं त्विति ॥ (कै)

भाष्ये

अल् चेति । (भा)

केवलात्मक इत्यर्थः ॥

---

१ लुगपवादो णो विज्ञास्यतेऽन्यथाऽण एव लुकि सिद्धे ण विधानमनर्थकं स्यादित्यर्थः ॥ २अ ४ । पा १ । सू ९२ ॥

३ तान्येतानि त्रीणि ग्रहणानि भवन्ति । भा ॥

४ अ ६ । पा १ । सू ६७ ॥

अन्यश्चेति। (भा)

समुदायात्मक इत्यर्थः॥

[1]अयं साम्प्रतिक इति। (भा)

[2]"वेरपृक्तस्य" इति सूत्रे उद्देश्यतया प्रधानस्य विग्रहणस्य मुख्यार्थत्वलाभाय हल् इत्यत्र सौत्रो मतुप् लोप इति भावः॥

हलः प्राधान्यादिति। (कै)

संज्ञावाक्यार्थप्रतिपत्त्युत्तरमेव प्रदेशार्थप्रतिपत्तेरसंजातविरोधन्यायेन तत्रोक्तकल्पनानुचितेति भावः। किं च शास्त्रस्याल्पविषयतापत्तिरित्यपि बोध्यम्॥

किं न गौणीति। (कै)

क्लिष्टेत्यर्थः॥

[3]किमनेनेति। (कै)

"वेरपृक्तस्य" इत्यस्य लक्ष्यानुसारात् सर्वत्र प्रवृत्त्यङ्गीकारे इत्यर्थः॥

तिलोपः स्यादिति। (कै)

आगमविशिष्टस्य तित्त्वात् हलन्तत्वेनापृक्तत्वाच्च याट् इत्यस्य

---

१ अयं साम्प्रतिको विग्रब्द इति क्विबादिषु भूतपूर्वगतिर्न लभ्यते तत्राऽपृक्तसंज्ञायां हलग्रहणेन हल्वान् गृह्यते। यथा गुरोश्च हल इत्यत्र गुरुमान्॥ २ अ ६। पा १। सू ६७॥

२ क्विबादयोऽपि हल्वन्तो दर्विरित्यादौ विप्रत्ययोऽपीति किमनेन व्यवच्छिन्नं स्यादित्यर्थः॥

लोपः स्यादित्यर्थः ॥ अच पचे [1]"हल्ङ्याब्" इति सूत्रे हल्ग्रहणं नास्त्येवेति भावः ॥

[2]अल्ग्रहणे त्विति । (कै)

तदुपादानसामर्थ्येन तदन्तविध्यभावादिति भावः ॥

ज्ञापित इति । (कै)

एवं चात्र जातिग्रहणशंकाकरणायैवैकग्रहणं चरितार्थमिति कथं ज्ञापकमिति भावः ॥

पुनरिहेति । (कै)

युगपदेव विनिगमनविरहात् प्रमाणद्वयप्रवृत्तिरिति भावः ॥

[3]वृद्धिरादैजिति । (पा)

अस्य तत्त्वं तत्रैवोक्तम् ॥

व्यवस्थापितमिति । (कै)

मयेति शेषः ॥

---

१ अ ६ । पा १ । सू ६८ ॥

२ अल्ग्रहणे तु क्रियमाणे न कर्त्तव्यं कृतं तु ज्ञापनार्थं तद्दर्शितं भाष्ये । यद्यप्ययमर्थो "निपात एकाजनाङ्" (१ । १ । १४) इत्यत्रैकग्रहणेन ज्ञापितस्तथापि मन्दबुद्धीनामनुग्रहाय पुनरिह ज्ञापितः । अपक्त-प्रदेशेषु हल्ग्रहणेनैव सिद्धे संज्ञाविधानं विस्पष्टार्थम् ॥

३ "वृद्धिरादैच्" (१ । १ । १) इत्यत्रास्य परिभाषात्वं व्यवस्थापितमिह कथं संज्ञात्वेन व्यवहारः । परार्थसामान्यात् परिभाषा संज्ञात्वेन व्यवक्रियते इत्यदोषः ॥

(तत्पुरुषः समानाधिकरणः कर्मधारयः । १। २। ४२ ।)

[1]तत्पुरुषः समानाधिकरणः कर्मधारयः । १ । २ । ४२ ॥

समासैकार्थत्वादिति । (भा)

वार्त्तिके समासस्यैकप्रवृत्तिनिमित्तत्वादित्यर्थः ॥ पर्य्याय-व्यावृत्त्यर्थं

[2]भिन्नेति । (कै)

---

१ तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत् समासैकार्थत्वाद-प्रसिद्धिः । वा । तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत् समासस्यैकार्थत्वात् संज्ञाया अप्रसिद्धिः । एकोऽयमर्थस्तत्पुरुषो नामानेकार्थाश्रयं च सामानाधिकरण्यम् ॥ सिद्धं तु पदसामानाधि-करण्यात् । वा । सिद्धमेतत् । कथम् । तत्पुरुषः समानाधिकरण-पदः कर्मधारयसंज्ञो भवतीति वक्तव्यम् । सिध्यति । सूत्रं तर्हि भिद्यते । यथा न्यासमेवास्तु । ननु चोक्तं तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत् समासैकार्थत्वात् प्रसिद्धिरिति । नैष दोषः । अयं तत्पुरुषोऽस्त्येव प्राथमकल्पिको यस्मिन्नेकपद्यमेकस्वर्थ्यमेक-विभक्तित्वं च । अस्ति तादर्थ्यात् ताच्छब्द्यं तत्पुरुषार्थानि पदानि तत्पुरुष इति । तद्यस्तादर्थ्यात् ताच्छब्द्यं तस्येदं ग्रहणम् ॥

२ भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामा-नाधिकरण्यमुच्यते ॥

(तत्पुरुषः समानाधिकरणः कर्मधारयः । १। २। ४२ ।)

भिन्नप्रवृत्तिनिमित्तप्रकारकभिन्नोपस्थितिजनकत्वेत्यर्थः ॥ वस्तुतः पर्य्यायाणामपि कोशे सामानाधिकरण्यस्येष्टताया "[1]नामन्त्रिते समानाधिकरणे" इति सूत्रे भाष्ये ध्वनितत्वेनेदं चिन्त्यम् ॥ "गौरश्व" इत्यादौ तद्व्यावृत्तये

एकस्मिन्नर्थे इति ॥ (कै)

भाष्ये

एकोऽयमर्थस्तत्पुरुषो नामेति । (भा)

तत्पुरुषसंज्ञकनीलोत्पलादिशब्दार्थ एक एकोपस्थितेरित्यर्थः । यद्येकविशेष्यकप्रतीतिजनकत्वं सामानाधिकरण्यं तदा तत्पुरुषमात्रस्य कर्मधारयत्वापत्तिः । समानाधिकरणपदवैयर्थ्यं चेति तात्पर्य्यम् ॥

तत्पुरुषत्वमिति । (कै)

समासादिसंज्ञासमुदाय निवेशिनीति भावः ॥ ननु एकपदत्वैकविभक्तित्वयोः पौनरुक्त्यमित्यत आह

[2]पदशब्देनेति । (कै)

पदतदर्थयोरभेदोपचारादिति भावः ॥

---

१ नामन्त्रिते समानाधिकरणे । ८ । १ । ७२ । इह कस्मान्न भवति । अग्ने देवि सरस्वति इडे काव्ये विद्महे एतानि ते अग्ने नामानि । योगविभागः करिष्यते । नामन्त्रिते समानाधिकरणे सामान्यवचनम् । ततो विभाषितं विशेषवचन इति ॥

२ पदशब्देनार्थोच्यते । एकार्थमित्यर्थः ॥

Pariçiṣṭa Parvan, (Text) Fasc. 1–5 @ /6/ each	Rs.	1	14
Prākṛita-Paingalam, Fasc. 1–6 @ /6/ each		2	4
Pṛithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each		14	10
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-4 @ /6/ each ...		1	8
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1–3 @ /6/		1	2
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Ṭhi S'îñ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each		13	0
Rtogs *brjod dpag ḥkhri S'îñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4	14
Al-Mnqaddasi (English) Vol. I, Fasc. 1–2 @ /12/		1	8
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37	0
Ditto English Fasc, 1–6 @ 1/ each		6	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each ...		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3	0
Futūn-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each ...			
Maghazi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each ...			

* The other Fasciculi of these works are out of stock and will be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each ...		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...		7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ...		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each		1	14
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar ,, ,, ...	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899	4	0

... of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each 29

... Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

... Money Orders, &c., must be made payable to the "Treasurer,

20-6-1901.

... supplied by V.-P.P.

PK
531
A15
1899
v.2
pt.1

Pātañjalī.
Mahabhasyapradīpodyotah

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY